CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाग्निहोत्रंजुहुयादाद्यंते श्रुतिशेषः सदेत्यादिवत्प्रत्यक्षमेव विधिं दृष्ट्वा निर्विचिकित्सो यजनन्नाधावश्याद्धिस्वय
प्रत्यक्षाविधिर्नोपलभ्यते· तावन्नदनादरेण प्रत्यक्षोपलब्धस्त्ववानुष्ठेय इति· तेन स्वतन्त्र एव तत्रोदाहरणं न
न्यस्यस्वारिण· किंच नैषामिह प्रामाण्यप्रामाण्यचिंता किंतु स्वतंत्रणामेव वेदवत्प्रामाण्यमुत स्मृतिवत्पर
तंत्राणामिति· यद्यप्यवतन्नामैषामपि तत्र विचारस्तेषामपि तु मन्वादेः वाक्यानामिह स्वातंत्र्यनिराकरणं·
अथवा गान्यत्रोदाहरणं· तेषां हि षडङ्गमेक इति वेदत्वस्मरणात् स्वातंत्र्यमात्रं काल्पायते· अथवा शाक्यादि
ग्रन्थानां श्रुतिमूलकत्वेन प्रामाण्ये निरस्तेऽस्य प्रति श्रुतिवदेवतत्प्रामाण्यमात्रं च निराक्रियते· तदेता
निचत्वार्यपि विविच्चा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्मिमनुष्याः पूर्वमंजत इति प्रसिद्धवत्सव्यस्य पूर्वमंजनं निर्दिष्टं तददृष्टप्रयोजनाभावात्प्रमाणान्तरेण
प्राप्तमित्यनुपपत्त्या विधिः कल्प्यते तथा तस्मादपि वध्यं प्रपन्नं न प्रतिपद्य छं ति· तस्माद्गर्भेणाविज्ञातेन
धृत्लहे स्येवं विधं स्मृतीनां मूलं अत एव चेष्टस्मान्न प्रसिद्धिः· प्रत्यक्षश्रुताववि हितत्वात्· दर्शपूर्णमासादि
षु प्रत्यक्षविधिसद्भावात्केन त्वं रमसे वच विशेषमभिप्रेत्य गौतमोक्तः प्रत्यक्षाविधानाद्गार्हस्थ्यस्येति· न
नु स्मृति परंपरयैवानुमेयत्वमन्धपरंपरादोषात्· अत एव प्रत्यक्षाविरोधे स्मृतेरनुष्ठानं· स्मृतया
हि सिद्धवन्निर्देशानुपपत्तिकल्पितविधिमूलत्वयापि संधार्यते· कल्पनां च प्रत्यक्षश्रुतिविरोधेनुप
पन्नानेनाविरुद्धविषयवद्विरोधविषयेपि न्यायाभासेन विधिं कल्पयित्वा किमियं स्मृतिः प्रवृत्ता किं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वान्म्लेच्छप्रसिद्धेऽर्थे गौणप्राप्त्यादिनिमित्तप्रयोगभांजि विप्लुतिं गच्छेयुः । नह्यसति मुख्ये गौणादिसंभवः । त
स्मान्म्लेच्छप्रसिद्धस्वार्थेऽमीषामित्यवसीयते । अतः सिद्धमविरुद्धेषु प्रसिद्धवाचकत्वेषु म्लेच्छानामभिधेय
निर्णये प्रामाण्यं ॥११॥ प्रयोगशास्त्रमिति चेत् ॥ अत्र कल्पसूत्राण्युदाहृत्य किं प्रमाणमप्रमाणमिति भा
ष्ये विचारितं । ननु स्मृत्यधिकरणे सर्वेषां वेदातिरिक्तानां प्रामाण्याप्रामाण्यचिंता ह्युक्ता । तत्र केचि
दाहुः । तत्राशब्दतया पूर्वपक्षमुक्त्वा शब्दानुमानेन सिद्धान्तितं । इदानीं च वैदिकार्थनिबन्धनत्वात्प्र
त्यक्षश्रुत्यानीति न तत्रोदाहरणं । स्मृतयो हि प्रायेण न लतो विप्रकीर्णपरप्रकरणपरवाक्यशेषगतसि
द्धवन्निर्देशानुपपत्तिकल्पितनतिरोहितप्रायविधिमूलाः । तद्यथा नयनं दक्षिणं दीक्षितः पूर्वमंक्ते सव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१० श्रा·टी· स्यते· तत्र पूर्वःपक्षः· म्लेच्छेषु हि पदार्थानां विप्लुतिर्भूयसी यतः ततस्तेषु प्रसिद्धेऽर्थे न विश्रंभः कथञ्चन पदानि प-
दार्थाश्चापभ्रंशप्राया एव म्लेच्छेषु बाहुल्येन· तेषु कथमिवाविप्लुतपदार्थावधारणं· अतोऽप्रमाणं म्लेच्छ-
प्रसिद्धिः नहि ते दृष्टार्थव्यवहारित्वाच्छब्दार्थाविप्लवे यत्नं कुर्वन्ति· तस्माद्विप्लुतिसंभवान्नेषु प्रसिद्धोऽर्थो न
विश्रंभणीयः निरुक्तादिद्वारेण त्वर्थकल्पनमपि पिकादीनामिति· सिद्धान्तस्तु· पदानि तावदेतानि वेदादि-
ष्वेव दर्शनात् अविप्लुतानि तेषां च भाव्यमर्थेन केनचित्· नित्येनार्थेन ध्वंसो नास्ति यतो म्लेच्छेषु विप्लुतिः म्ले-
च्छप्रसिद्ध एवार्थस्तेषामिति हि निर्णयः· पिकादिपदानि तावद्वेदतदङ्गादिषु दृष्टत्वादविप्लुतानि नि-
त्यानि तदेषां नित्येनैव केनचिदर्थेन भवितव्यं· न चामीषामार्येष्वर्थः कश्चिदस्ति यत्र मुख्यानि भू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रापमिति चिंत्यते· पिकनेमसततामरसादिशब्दानां क्वचिदार्याणां प्रसिद्धः· म्लेच्छानांतु कोकिलादिषुप्रसि
द्धः तत्रपद्यप्रमाणमेवम्लेच्छप्रसिद्धिः· ततस्तेषां निरुक्तादिवशेनार्थकल्पनमथवासाप्रमाणं ततः से
वाश्रयिष्यते· तदत्रम्लेच्छप्रसिद्धिः· प्रामाण्यपयोग्यानवेत्येतावदधिकरणशरीरं सत्यपितुप्रामाण्ये किंम्ले
च्छगतत्वाद्दुर्बलानिरुक्तादिद्वाराशास्त्रार्थत्वाद्बलीयसी उतेयमेवदुर्बलाकल्प्यत्वान्म्लेच्छप्रसिद्धिस्तु
रूपत्वाद्बलीयसीत्येतत्यासंजिकं शिष्याकोपेये तदवस्थितं स्वरूपगतमेवबलाबलंप्रमाणगं तर
काङ्क्षायदृत्ति ते नैवन्यायेनागापिप्रयोगरूराबत्नाबत्नात्कृप्रकल्प्यत्वेन स्वरूपगतमेवज्यायो 3
भवति· तेनगतप्रायमिहप्रसङ्गतउक्तं भाष्यकारेण प्रामाण्यसंभवासंभवमात्रंतुम्लेच्छप्रसिद्धेश्चि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१८
श्री. ४८

स्थितं यदा चैकवाक्यशेषवशात् स्तोत्रीयानवकमपि वाच्यमित्यवधारितं यदा यत्र वाक्यशेषो नास्ति त्रिवृदग्नि
ष्टुदग्निष्टोम इत्यादिषु तत्राप्यनेनैवार्थेन भवितव्यं रूढिवशादिति दशमे वक्ष्यते चरुशब्दोप्योदनस्थाल्योः
परस्परसम्बन्धित्वाद्वाक्यशेषावधारितोदनवचनत्वेन स्थाल्यामन्याय्यश्चानेकार्थत्वमिति प्रतिबद्धशक्तित्वा
दाक्षारिकः तेनासत्यपि वाक्यशेषे सोयं चरुनिर्वपेदित्यादावप्योदनवचनत्वमेवेति दशमे वक्ष्यते अश्ववालै
न स्त्वीप्सता अपि काशाल्लयोरूढत्वादन्यत्रापि तदर्थीवे न भवतः न चात्र सन्दिग्धेषु वाक्यशेषादित्यनेन गत
त्वं असन्देहात् सन्दिग्धे हि वाक्यशेषात् प्रागर्थान्तरमेव निर्णीतं वाक्यशेषेण बाध्यते ननु प्रथमं सन्दिग्धं नेतन्निर्णी
यत इति ॥ १० ॥ चोदितं तु प्रतीयेताविरोधात्प्रमाणेन ॥ आर्यप्रसिद्धिविरोधे म्लेच्छप्रसिद्धेरप्रामाण्यमुक्तं इदानीं किं
म्लेच्छप्रसिद्धिरित्येवाप्रामाण्यमुत बलवद्विरोधादेवाप्रमाणं अविरोधे तु तस्याप्यपि भवत्येवाभिधेयनिर्णयप्रामा

१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यो स्तुल्यबलत्वमुत वाक्यशेषस्याप्रतीतिर्बलीयसीति संशयः तत्र पदार्थपदसम्बन्धतुल्यत्वं लोकवेदयोः अ
द्व्यसाधनत्वे हि लोकाद्वेदो निरिच्यते विध्युद्देशात्तावद्वेदे तावदवगम्यते यदिह त्रिवृदादिशब्दाभिधेयं न ह्य
स्यार्थान्वयीति किं तु तस्याभिधेयमित्यन्यतोऽवगन्तव्यं तत्र लोकस्याप्यभिधेयनिर्णये वेदवाक्यशेषतुल्य
त्वं ततोऽधिकं वा सामर्थ्यमस्तीत्यर्थद्वयमपि तुल्यप्रमाणकत्वाद्विकल्पेन गृहीतव्यमिति पूर्वः पक्षः सिद्धां
तस्तु वाक्यैकत्वं विधिस्तुत्योर्विषये व्याहन्येत न हि तेनान्यवाक्यशेषस्याप्रतिपत्तिर्बलीयसी यदि लौकिको
र्थो विध्युद्देशे नाश्रीयेत अन्यार्थो वाक्यशेषो न्यार्थश्च विध्युद्देशः इति न कश्चन संबन्धः स्यात् तस्माद्यत्र वा 4
क्यशेषौ त्रिवृद्बहिष्पवमानमित्यादि अत्र तावत्तदनुगुणस्वार्थः समाश्रयणीय इत्येतावदिहाधिकरणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नइति न कथंचिदपि श्रुतिमूलत्वं संभावनीयं न चात्र विकल्पाभ्युपगमेनोभयोरपि प्रामाण्यं संभवति वस्तुनि
विकल्पासंभवात् नहि मातुलदुहितृपरिणयनात्प्रत्यवायोत्पत्तिरनुत्पत्तिश्च संभवति । त्यवरूपमन्यतरस्या
प्रामाण्यमाश्रयणीयं तत्र स्मृतिप्रमाणनिमित्तस्याचारस्य प्रामाण्यमिति सिद्धमेवं जातीयकानां दुराचारत्वं ·
अथवा त्रिवृद्बर्हिरश्ववालादौ यत्र लौकिकवाक्यशेषयोरर्थविप्रतिपत्तिः यथा त्रिवृद्बहिष्पवमानमिति
अत्र त्रिवृच्छब्दस्य त्रैगुण्यं लोकादर्थोवगम्यते वाक्यशेषात्स्तोत्रीयानवकं आदित्यः प्रायणीयः पयसि
चरुरिति चरुशब्दस्य स्थालीवाक्यशेषादोदनः अश्ववालः प्रस्तर इत्यश्वस्य वालः वाक्यशेषात्तु काशाः
प्लक्षयो विधृती इतीक्षवयवात्मिके लोकात् वाक्यशेषात्तु काशमूलके · किं च तत्र लोकवाक्यशेष

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्वादयः स्मर्त्तारः तत्र स्मरणं गुणावत्त्वरकर्तृकत्वादिना जनचारित्र्यादि अंभरणीयत्वरमिति व्यक्तमेतत् अपि चा
चरित्रहणां जनानां स्वयमितस्ततो विप्रकीर्णपरप्रकरणादिगतश्रुत्युद्धरणेनार्थप्रतिपत्तुमसामर्थ्यादवश्यमे
तेम्महर्षिभिरेव ज्ञात्वा स्मृत्वा समर्पितमर्थमनुतिष्ठन्तीत्यङ्गीकार्यं· अत आचारस्य स्मृतिकल्पने न श्रुतिकल्प्य
कत्वमिति भिन्नारितप्रामाण्यपादुर्बलत्वं· अपि चाचारेकर्मस्वरूपमानमेव प्रत्यक्षं कर्तव्यतानुविमर्शपूर्वम
र्थसुखहेत्वन्तरासंभवनिरूपणेन पारिशेष्यात्कल्पयितव्या· कल्पयित्वा पश्चान्मूलकल्पनमिति विप्रक
र्षः स्मृतिनिबन्धनास्तु स्मृतिषु प्रागेव ग्रन्थतः कर्तव्यता[illegible]म्यते· मूलमात्रं तु कल्प्यमिति सन्निकर्षः· सर्वे 5
यां च स्मृतिविरुद्धाचाराणां माजुलदुहितृपरिणयनादिविषयाणां कामादिहेत्वन्तरं विस्पष्टमेव दृष्टम्परं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धार्मिन इति स्थितं· भाष्यमप्यार्यम्लेच्छविगानाभिप्रायं व्याख्येयं वाक्यशेषश्चाप्यबलवत्त्वेनोक्तः नमूलहे·
तुतयेति। स्मृत्याचारविरोधेवा ॥ यत्र मन्वादिनिबन्धनानामनिबन्धनानां चाराणां विरोधो मातुलसुताहरणपरि
णायनादिषु तत्र किं तुल्यकक्ष्यत्वमुत स्मृतीनां बलीयस्त्वमिति चिन्त्यते· तत्र बलाबलविशेषस्तु केल्पान्त
रितकारितः श्रुतिस्मृत्योरिह त्वेवं न द्वयोः श्रुतिमूलतः श्रुत्या हि साक्षादर्थः प्रतीयते स्मृत्या तु श्रुतिकल्पनये
त्येकान्तरितप्रामाण्या श्रुतिर्बलीयसीति तेन तत्रोक्तं यत्स्मृतेरननुष्ठानलक्षणमप्रामाण्यं इह त्वेवं विरो
धो नास्ति द्वयोरपि श्रुतिमूलत्वेनैकान्तरितयोरविशेषात्तस्मात्समा विप्रतिपत्तिरिति· अत्रोच्यते सप्रत्य
यपरीतता हि स्मृतिः सोपपन्निबन्धना तस्यां स्तीत्वं बलीयस्त्वमाचारान्निर्निबन्धनात्॥ प्रत्यापितराहिम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यवहारानुपपत्तिप्रसङ्गात् कदाचित्कस्यचिदुपादानेऽप्यदोषविकल्पापत्तेरेकत्रमुख्यत्वेनान्यत्रगौण्या
लेनापिप्रयोगोपपत्तेर्गौणोपिप्रयोगेपार्श्वस्थानामुख्याभिमानसंभवात्तेरेवचान्येभ्योमुख्यत्वस्यक
नान्मुख्याभिधानपरंपरयानुवृत्तिसंभवात् अत्रयदिनकथंचिदपिविशेषोवधार्यतेतदागत्यभावादुभयोरप्य
भिधेयतास्यात् अस्तित्वभियुक्तानामभियुक्तयोर्विशेषः शास्त्रस्याहिशब्दैकसमधिगम्यधर्माधर्मादिव्युत्पत्तिलि
प्सयाशब्दार्थतत्त्वंविविच्यापरिपालयन्तोवृद्धास्तुटस्थार्थव्यवहारस्ययथाकथंचित्तत्सिद्धेः प्रयोजनाभा
न्नाविप्लुतिसिद्धेरियत्तेते अतोयद्यपिप्रतिपादकतामात्रमस्तेषुष्वपिसिध्यतितथापिविप्लुतिसंभवान्मुने 6
षुशब्दार्थतत्त्वसिद्धिरित्यार्यप्रसिद्धेवनिर्णयावलीयस्यार्थसिद्धिरितिपाल्यादिशब्दावक्षाद्यर्थाभि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुशब्दमार्याः कस्मिंश्चिदर्थे प्रयुंजते· म्लेच्छास्तु कस्मिंश्चिदिति तत्र चिन्त्यते । किं तुल्यबलत्वमुतार्यप्रसिद्धिर्बलीयसीति· तत्र तो
कप्रसिद्धिगम्यत्वाच्छब्दार्थस्योभयोरपि तयाविप्रतिपत्तिः स्याच्छास्त्रार्थो हि वृत्तावलम्ब्य· यः शास्त्रप्रमाणको धर्म
स्तत्र शास्त्राभियोगवद्भ्यो म्लेच्छेभ्यस्तदभियोगवतामार्याणामस्ति बलीयस्त्वं· व्यवहारगम्यस्तु शब्दार्थः
स च म्लेच्छानामप्यविशिष्ट इति प्रमाणाविशेषाद् विशिष्टो द्वयोरपि शब्दार्थः· यवाद्युच्चनादित्वकारणम
वध्यस्मरणं तदपि समानं म्लेच्छेष्वपि तस्मात्समेयमभिधानविप्रतिपत्तिः स्यादिति प्राप्ते ब्रूमः· प्रतिपा
दकतामात्रं म्लेच्छेष्वप्यवगम्यते· अविप्लुतस्तु शब्दार्थः शिष्टेष्वेवावधार्यते न तावदेवं न्याय्यं उभाव
पि शब्दार्थाविति· अनेकार्थशक्तिकल्पनाप्रसङ्गात्· शब्दप्रयोगेऽपि चान्यतरस्यानवधारणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निबध्यसामान्यात्मनाशिष्टाचारः प्रमाणमित्येवमुक्ते नैतावत्के विशेषः तस्मात्स्मृतिवदाचाराणामपि धर्मे प्रा
माण्यं सिद्धं ॥ तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यात् ॥ आचारप्रसङ्गेन तु शब्दार्थप्रयोगरूपाचारविप्रतिपत्तौ
बलाबलं चिन्त्यते अत्र भाष्ये आर्यम्लेच्छविशेषानुपादानादुक्तशेषेण सिद्धान्तकथनाच्छिष्टाचारस्य च पूर्वं प्रकृ
तत्वाद्यत्र शिष्टानामेव मिथोऽभिधानविप्रतिपत्तिः केषांचिद्वाक्यशेषानुगुणा केषांचिदननुगुणा तत्रातुल्यबलता
माद्यवाक्यशेषानुगुणाया बलीयस्त्वं प्रतिपाद्यत इति लभ्यते तन्नूदाहरणाभावाद्यवादिशब्दानां दीर्घशूकादिष्वेव
सर्वशिष्टप्रयोगादन्यस्यापि शिष्टप्रयोगविप्रतिपत्तिविषयस्योदाहरणस्यादर्शनात् सन्दिग्धेषु वाक्यशेषादि
ष्वनेन गतप्रायत्वाद्वाक्यशेषाच्चेन्निर्णयस्ततोऽसति वाक्यशेषेऽभियुक्तानामनभियुक्तप्रसिद्ध्योस्तुल्यबलत्वप्र 7
सङ्गादयुक्तमिति मत्वाऽऽचार्यैरन्यथाधिकरणं व्याख्यातम् यत्रार्यम्लेच्छयोरभिधानविप्रतिपत्तिः यथावापी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

माराणमप्रमाणंवेति सन्देहः तदर्थं च श्रुतिमूलत्वं भ्रान्त्यादिमूलत्वं वेति चिन्तनीयं तत्र स्मृत्यधिकरणोक्तसामा।
न्याद्राचाराणामपि स्मृतिवत्प्रतिपादितमपि प्रामाण्यं निर्निबन्धनतया व्यतिक्रमसाहससंस्काराच्च। क्षिप्यसमाधी
यते यदि वसन्तोत्सवादियोऽष्टकादिवद्वेदमूलो भवेत्स्मृतस्तर्हि देव मन्वादिभिरपि निबध्येरन् अनिबन्धनात्
तु तेषां मूलं केनचिद्दृष्टं आचारपरंपरामात्रमेव दृष्ट्वा मन्वादिभिरपि सदाचारः प्रमाणमित्येवं परोक्षरूपेणा
भिधानात्प्रामाण्यमनुमीयते इति मन्यामहे तत्र सैवान्धपरंपरा स्यात् धर्मव्यतिक्रमसाहसदर्शनाच्चानाचारमा
शङ्क्यं धर्माध्यवसानमिति पूर्वः पक्षः। सिद्धान्तस्तु धर्मबुद्ध्या वैदिकेष्वनुष्ठानमसतिच वैदिकत्वेनुपपन्नं व्य
तिक्रमसाहसदर्शनं तु रागद्वेषादिनिबन्धनत्वादधर्मबुद्धिनिबन्धनधर्मबुद्धिनिबन्धनस्य चाचरितस्यागमस्मार
णकारणतोऽस्तु नि स्मृतिविरोधाद्दर्शनाच्चधर्मलिङ्गत्वाव्यभिचारः मन्वादिभिस्तु लाघविकेर्यादिनाम स्वरूपेण।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्त्राभासानामप्रामाण्यमुक्तं तत्रैव चोद्योत्तरत्वेनाथ सूत्रद्वयं व्याख्येयं· यद्यपि श्येनहिंसादिवचनं श्रुतिस्मृतिशि
ष्टं न कोपयति तत्प्रमाणं भवति न वेत्तत्रोत्तरं· तच्छास्त्रपरिमाणत्वादिति· न खलु येन केनचित्प्रमितो धर्मः
फलं साधयति स्वाध्यायोध्येतव्यो वेदोऽखिलो धर्ममूलं तद्विदां च स्मृतिशीले धर्मस्तु समयः प्रमाणं वेदाश्च
पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दशेत्येवमादिभिरे
व धर्मप्रमितेर्नियमादन्यतः प्रमितस्य फलसाधनत्वाभावेन धर्मत्वाभावात्तेषामप्रामाण्यमिति· यत्तु
तृतीयसूत्रं अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन् तेष्वदर्शनाद्विरोधस्येति तत्सदाचारप्रामाण्यप्र
तिपादनार्थमधिकरणान्तरं व्याख्येयं· अत्रानिबन्धनाः संप्रचाराः· वसन्तोत्सवादिविषया उदाहरणं प्र 8

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णबलाबलस्यपूर्वभावित्वं नहिप्रमाणयोः स्वरूपतोविरोधः अपितुप्रमेयविरोधनिमित्तः प्रमेयगतं हि
विरोधमात्मन्याप्रमाणेविरोधमुद्भावयन्ति· तद्यदेवप्रमेययोर्विरोधोगम्यते तदैवतयोर्बलाबलमपीति·
ततएवनिर्णीयेत तेनैराकांक्ष्यात्प्रमाणबलाबलमनादर्तव्यमितिनस्मृतेर्बाधः यद्धिस्वभावत एवाप्र
माणं तत्सर्वदैवानादर्तव्यं· यत्तुबलवद्विरोधापेक्षमप्रामाण्यं तत्तदभावापेक्षप्रामाण्यमेवेत्यवगं
तव्यम्· नचात्रबाधकमस्तिप्रमाणबलाबलस्याबाधकत्वात्· तस्मादाचमनादेर्बलीयस्त्वात्तदनुरोधेनै
वश्रुत्युक्तक्रमादयोबाध्यन्तइत्याचमनादिस्मृतीनामबाधात्प्रामाण्यमिति· नात्विदमेवमधिकरणं पू
र्वपक्षस्यातिमहत्त्वाद्यज्ञोपवीतादेश्चप्रत्यक्षश्रुतिनिहितत्वेनानुदाहरणत्वात्· तस्माद्यत्पूर्वंव्याख्यादिश्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽपि च दौर्बल्यं पदार्थेभ्यो गुणत्वात. सर्वेषु हि पदार्थेषु प्राप्तेषु प्रयोगवेलायां तद्विशेषणतया क्रम आश्रीयते इ
ति तेन पदार्थप्राप्त्यपेक्षत्वात् क्रमस्यान्यन्न जघन्यप्रमाणकोऽपि पदार्थः पूर्वं प्राप्नोति. पश्चात् क्रमः सर्व
पदार्थप्रयोगाङ्ग तथा च तस्य नापि न पदार्थैर्विरुध्यते कालेऽप्येवमेव प्रयोगाङ्गत्वात् यावन्तः पदार्था अव
धारितास्तेषां सर्वेषामेव पूर्वोक्तादिकालत्वं प्रधानसान्निकर्षः प्रयोगप्रारम्भावच्छेदपरिमाणं ननु क
स्याचिच्छास्त्रस्यार्थः प्रयोगविधिरपि न तदाक्षिपति. अन्यथा ह्यविस्मरणासिद्धेः अथापि शास्त्रार्थत्व
थापि प्रयोगो यथा क्रमात् प्रयोगस्य च प्रयोज्यपदार्थप्राप्त्यपेक्षित्वादविरोधित्वं. यद्यपि क्रमादीनामाचम
नादिभिर्विरोधः स्यात् तथापि सर्वपदार्थगुणत्वाद्दौर्बल्यं आचमनादयस्तु पदार्थत्वाद्बलवन्तः. ननु प्रमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१२
२।१।४१

श्रुतिबलीयस्त्वात्स्मृतेः स्यादप्रमाणता। पूर्वभाविप्रमाणस्थं प्रमेयस्थाद्बलीवत्वात्। ज्यायस्त्वेनैव निर्णीतेन पश्चा
दितरादरः। प्रयोगप्राग्भावस्य प्रयोगवचनावगतो यश्च पूर्वोक्तदिः परिमाणं त्वविस्मृत समस्तपदार्थानु
ष्ठानासिद्ध्यर्थं प्रयोगविधिनैवाकांक्षितं पदार्थविधिप्रचयावगतं तदेतत्त्रयमपि क्रमकालपरिमाणात्मक
माचमनादिभिरन्यथात्वप्रतिपद्यमानेनाविरोधस्तावदस्त्येव विरोधे च श्रुतेर्बलीयस्त्वात्स्मृत्यर्थस्याचमनादे
र्बाधः। नन्वश्रुत्यर्थस्यैव पदार्थगुणत्वात्क्रमादेर्दौर्बल्यमाचमनादेः स्मृत्यर्थस्यापि पदार्थत्वाद्बलीयस्त्वा
मिति वाच्यम्। प्रमाणपूर्वको हि प्रमेयावगतः तेन पूर्वभाविप्रमाणस्थबलाबलं पूर्वमवगम्यते तेन चाच
मनादिभ्यः क्रमादीनां बलीयस्त्वे निर्णीते निराकाङ्क्षत्वान्न पश्चादवगतं प्रमेयबलाबलमादर्तव्यं
तस्मादाचमनादिस्मृतीनामप्रामाण्यम्। सिद्धान्तस्तु पदार्थप्राप्त्यपेक्षत्वात्क्रमादेरविरोधिता। विरोधे

११

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यज्ञोपवीतिना कर्त्तव्यं दक्षिणाचारेण कर्त्तव्यमित्येवमादीनि कल्पवर्थाऽस्मरणानुदाहरणं किं प्रमाणमप्रमा
णं वेति विचारः तदर्थश्च प्रत्यक्षश्रुत्या विरुद्धत्वेन वेति तदर्थमप्येभिः किं क्रमध्येनुष्ठीयमानैः कस्यचिद्भूत्य
र्थस्य क्रमादेर्भवति बाधो न वेति अथवाभ्युपेत्येव विरोधं प्रमाणमप्रमाणं वेति विचारः तदर्थं च प्रमाणप्रमे
यबलाबलविसंवादे किं न्यायपरमिति चिन्त्यते तथाहि श्रुतिस्मृत्योः प्रमाणयोः श्रुतिर्बलीयसीति स्थितं अतः श्रो
तत्वात्क्रमादयः स्मार्त्तेभ्यश्च आचमनादिभ्यो बलीयांसो विज्ञायन्ते प्रमेयस्वरूपालोचनेन तु पदार्थगुणत्वा
त्क्रमादेराचमनादयः पदार्था बलीयांसो वगम्यन्त इति बलाबलद्वयविसंवादात्कतरेण निर्णय इति सन्देहः 10
तत्र पूर्वः पक्षः अस्मुक्तानां क्रमादीनां स्मार्त्तैराचमनादिभिर्व्याकोपः स्यात् अनस्तावद्धि स्थैर्येव विरोधिता तत्रि
~~[illegible]~~वल्ल्यं पदार्थेभ्यो गुणत्वतः। सर्वेषु हि पदार्थेषु प्राप्तेषु प्रयोगवेलायां तानहि शेषगुणतया क्रमः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राक्रियते· तेषांञ्च सत्यपि प्रसिद्धवैदिकैरग्निहोत्रादिभिः कर्तृसामान्ये भिन्नप्रस्थाना वा वेदा मूलं भविष्यन्ती
ति· यथैवाथर्वणस्य त्रय्या भिन्नरूपता तथा चतुर्भ्योपि वेदेभ्यो भिन्नरूपा वेदाः संभवेयुः· ते [illegible]रान्नीं प्रलीनाः· म
न्वादीनामपि हि केचित्प्रलीनशाखामूलतामनुमन्यन्ते · तद्वदिहापि भविष्यति· इत्थं च संभवति प्रामाण्ये ना
प्रामाण्यमुक्तमिति भवन्ति केषांचिदाशंका सा च मन्दविषया येन निराकर्त्तव्येत्येवमर्थमिदमधिकर
णं कृतः पूर्वः पक्षः· सिद्धान्तस्तु अविच्छिन्नवैदिकपरिग्रहानुपपत्त्या मन्वादिष्वनुपलभ्यमानोपि वेदः
कल्पितः· शाक्यादिष्वत्यन्तविपरीतमवैदिकमप्रमाणं चेत्तदित्येवं शिष्टानां स्मरणं· वेदहेतुकत्वेन संप्र
माण्यमनुमन्यन्ते इच्छानुसारिणी च कल्पना न तद्विपरीतपरिकल्पने भतो न वेदकल्पनादर्शनसीत्यप्रामाण्य
मेव तेषामसन्मूलत्वादिति·॥ शिष्टाकोपे विरुद्धमिति चेन्न शास्त्रप्रमाणत्वात् ॥ आचान्तेन कर्तव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

थाऽऽ अङ्गं वा समभिव्याहारादविशेषाद्भूमौ वेति वचनत्वप्रामाण्याध्यवसानं · व्यवहारविज्ञो यो चित्यप्रतिपादनार्थं चे
दं स्मृत्यंविरोधे त्वनपेक्षं स्यादिति श्रुतिस्मृतिविरोधे यत्प्रमाणान्तरानपेक्षं श्रुतिवाक्यं तदेव ग्राह्यं · असति
ह्यनुमप्रत्यये परप्रत्ययानुमानं केशाग्रयलोमिति · यथाहुः यावदेकं श्रुतौ कर्म स्मृतौ चान्यत्प्रतीयते · ता
वत्तयोर्विरुद्धत्वे श्रौतानुष्ठानमिष्यत इति · तेन फलतोऽप्रामाण्यं श्रुतिविरुद्धानां स्मृतीनामिति स्थितं ·
भाष्यमप्यननुष्ठानरूपाप्रामाण्यपरं व्याख्येयं · यद्वा · यान्येतानि त्रयीविद्भिर्न परिगृहीतानि शाक्यादि
भिर्निर्मितानि धर्मशास्त्राभासानि तेषामनेनाप्रामाण्यं पूर्वसूत्रोक्तकर्तृसामान्यप्रत्युदाहरणत्वेनोच्य
ते · तेषां हि प्रत्यक्षादिमूलत्वेन प्रामाण्यं प्रत्यक्षसूत्रे निराकृतं मन्वादिवद्वेदमूलत्वेन प्रामाण्यमिह नि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णस्यात्· तच्च प्रत्यक्षश्रुतिविरोधेन नोदेतीति सर्वपुरुषाणां साधकप्रमाणाभावादीश्वरकरमभावधारणस्यात्· न
च नदर्शनात्युक्तम्· अन्धपरम्परादोषात्· अतः पुरुषान्तराणामिह प्रत्यक्षसंभवात्तस्य चात्मप्रत्यक्षतुल्यत्वात्त
स्मान्न श्रुतिनिराकरणं· तदुक्तं आत्मीयात्परकीयस्य दौर्बल्यं न हि किंचन· प्रत्यक्षत्वाविशेषेण स्वप्रत्य
क्षसमं हि तत्· यदा चैवं स्वशाखापठितश्रुतिमूलत्वप्रमाणकं स्मार्त्तमपि वेदवाक्यं संभाव्यते तदा स्व
२ निखिलं कर्मानुमानं केनचित्स्मृतिवच्यतशतिननिर्मूलत्वं स्मर्यते· शक्यते वक्तुं· ततश्च वेदे तस्य दर्शनयो
रात्मीयपरकीयप्रत्यक्षश्रुतिविहितयोस्तुल्यकक्षप्रमाणतया विकल्पो न्याय्यः· यदि परमात्मीय
स्य प्रत्यक्षस्य विश्वंभरणीयतया ते नैव परप्रत्ययनादरो न्याय्यः। व्यवहारः क्रियते ततः क्रियतां अनादर
णं स्वसहस्रतये यं शेपरप्रत्ययस्याहृत्यदूर[illegible]स्य न्यायाभासनिमित्तत्वसंभवाद्भ्रान्त्यादिमूलत्वसंभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्सन्नवाक्यमपि पुरुषान्तरप्रत्यक्षतया संभाव्यमानं कथमिव शक्यं नास्तीति वक्तुं · द्वेधा हि तस्याभावावधारणं · बाधक
प्रमाणसद्भावात् · साधकप्रमाणाभावाद्वा भवेत् · बाधकसद्भावोपि द्वेधा दृश्यादर्शनाद्वा तदभावनियतार्थान्तरद
र्शनाद्वा · न तावद्दृश्यादर्शनं सम्भवति शाखोपलम्भाभावादित्युक्तम् · न च विरुद्धश्रुतिदर्शनं तदभावनियतं
येन तद्दर्शनात्तदभावोवधार्येत विरुद्धानामपि ग्रहणाग्रहणादिश्रुतीनां सहस्रदर्शनात् · तेन न तावद् 12
बाधकसद्भावो नापि साधकाभावः · सकलवादीयः सर्वेषां वा भवेत् · न तावत्स्वप्रमाणनिवृत्या व
स्तुभावनिश्चयोतिप्रसङ्गात् · न च समस्तपुरुषाणां तत्र प्रमाणं नास्तीति शक्यं निश्चेतुं · संभवति
हि तस्य शाखान्तरे समाम्नानं पुरुषान्तरेणापि प्रत्यक्षीकरणं नित्यानुमेयत्वे हि सर्वेषामिहानुमानमेव प्रमा

वेदस्याश्चात्र तो मूलत्वहेतुरिति ततः स्मृत्युपपत्तेर्नान्यत्ता परिदृष्टवैदिकवचनकल्पनोपपत्तिः । अतः श्रु
तिसिद्धस्य कर्त्रा च स्मरणमप्रमाणमतोऽन्यत्प्रमाणमिति ॥ यस्त्वाचार्यैरधिकरणभंगो दर्शितः तत्राय
मभिप्रायः भवेदेवं स्मृतेर्वाधो यदि स्मृतिमूलं न कदाचिदपि कैश्चित्कस्यांचिदपि शाखायां पठ्यत इत्य
ध्यवसातुं शक्यते । तदा हि तत्र सर्वपुरुषाणामेव प्रत्यक्षप्रसराभावात् केवलं स्मृत्यनुमानसमधिगम्य
श्रुतिवाक्यं अनुमानस्य प्रत्यक्षविरोधादनुदयात् सकलजनसमस्तप्रमाणपथानवतीर्णगगनकुसुमा
यमानं स्यात् । न चैवमध्यवसातुं शक्यम् । अनन्तचरणधारणामनेकसहस्राणां वेदशाखानां कार्त्स्न्येनोपा
लम्भासम्भवात् । एवं चानध्यवसीयमाने सत्यपि विरोधे दुर्निभततरमप्रामाण्यमनित्यानुमेयश्रुतिमूलत्वानु
मानिराकरणात् । यदा हि शाखान्तरगतानि पुरुषान्तरप्रत्यक्षाण्येव वेदवाक्यानि स्मृतीनां मूलं तदा वे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थतामासाद्य काल्पनिकी श्रुतिः प्रामाण्यं लभते· तस्यां च कल्पितायां तद्विरोधात्स्मृतेर्नास्य पाक्षिकत्व
मितीतरेतराश्रयत्वं स्यात्· अतोऽत्र श्रुतिसंभवात् स्मृत्यादिमूलकत्वादप्रमाणमेवंजातीयकं स्मरणं· न ह्यसं
भवद्व्याप्त्यादिकं स्मरणं कस्यचिदपि ज्ञातुं शक्यमध्यवसातुं· सम्भाव्यमाने तु भ्रान्त्यादौ हेत्वन्तरेण दृष्ट
कल्पना· असति तु विरोधे कर्तृसामान्याद्धेतोर्दिकपरिग्रहदार्ढ्याच्च श्रुत्यनुमानमिति न सर्वत्रैकरू
प्यमिति॥ हेतुदर्शनाच्च॥ अधिकरणान्तरमारभ्य प्रमाणकारणं श्रुत्याविरुद्धस्मरणमुदा
हरणं· वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णातीत्यादि· तत्र प्रमाणमप्रमाणं वेति विचारः· कर्तृसामा
न्यात्पूर्वपक्षश्रुतिविरोधाभावाच्च प्रामाण्यमिति प्राप्ते उच्यते· नह्यत्र हेतोर्हेत्वन्तरानुमानं प्रक्रम 23

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शास्त्रानाक्रांतविषयपरत्वमिति नाप्रामाण्यं । न चैवं स्मृतिविरोधेन श्रुतिस्वरूपभंगेन स्पर्शनस्य पाक्षिक
त्वं कल्पयितुं शक्यते स्मृतेः स्वतो प्रामाण्यत्वेन श्रुतिबाधासामर्थ्यात् । श्रुतिकल्पनस्यैव प्रत्यक्षश्रुतिवि
हितस्पर्शविरोधेन निरुद्धत्वात् । ननु पाक्षिकत्वेनापि प्रत्यक्षश्रुतेरुपपन्ने यस्मिन्पक्षे स्पर्शो नास्ति तत्र
स्पर्शाभावेन वेष्टनस्यापि शक्यानुष्ठानत्वात् । नहि मयि श्रुतिकल्पनमनुपपन्नमिति चेन्न । इतरेतरा
श्रयात् । स्वरसतो हि श्रुतिवाक्याद् पाक्षिकस्पर्शो न गम्यते । तस्मिंश्चापाक्षिके न स्मार्तश्रुतिकल्पनसं
भवत्वात् । नहि स्पर्शतावेष्टयितुं शक्यते । न च स्पर्शनस्य पाक्षिकत्वे सति शक्यार्थतामासाद्य कल्प
नीका श्रुतिः स्मार्तं न भते तस्यां च तन्मात्मिकायां तद्विरोधात्स्पर्शनस्य पाक्षिकत्वे सति शक्या

यत्नेन तथापि न तन्मात्रं विधिः किं तु कर्तुः समीहितसाधनताज्ञानाशक्यार्थकर्तृत्वं संभवतीत्यप्रामाण्यं यथोक्तं आख्यातानामर्थं ब्रुव
तां शक्तिः सहकारिणीति तेनाशक्यानुष्ठानमर्थद्वयं बोधयतोः प्रमाणयोः प्रमेयविरोधाद्द्वयमन्यतरबाधितम् तत्र प्र
त्यक्षेणानुमानस्य बाधोऽग्ना विवक्षितत्वानुमानस्येति सिद्धमप्रामाण्यं स्मृतीनां श्रुतिविरुद्धानां व्रीह्यादिषु न द्वयोरपि प्रत्यक्षत्वे
नागम्यमाणविशेषत्वान्नैकेनेतरस्य वाधः संभवति विरुद्धार्थत्वाच्च न द्वयो रंजस्येन प्रामाण्यं नचाप्रामाण्यं अविद्यमान
दोषयोः संभवतीति गत्यन्तराभावादुभयोरपि पाक्षिको वाधः कल्प्यते नचैवं शास्त्रस्याप्रामाण्यं यथा सामान्यशा
स्त्रस्य विशेषशास्त्रवाधितस्यापि नाप्रामाण्यं तद्वदिहापि ननु वाधितं भवत्यप्रमाणं च न भवतीति व्याहतमेतत् सत्य
मेतत् तत्र पारमार्थिकः शास्त्रार्थो वाध्यते येनाप्रामाण्यं शास्त्रस्य स्यात् किं तु प्रतिपक्षमनालोचयतो यः शास्त्रस्य स्व 14
रसतः सार्वत्रिकः प्रत्ययः सोत्र वाध्यते तद्वाधाच्च पाक्षिकानुष्ठानपरत्वं शास्त्रस्याध्यवसीयते सामान्यशास्त्रैव विशेष
स्य

शा.भी.

मुपपन्नमिति नैकस्यापि बाधो युज्यते · किमिदानीं सागरं तरेदग्निना सिंचेदित्यादीनामपि प्रामाण्यं अननुष्ठीयमा
नस्यापि शक्तिसम्भवात् · आहवनीयस्य न पदेन बाधः स्यात् · अविरुद्धस्य दुर्लभस्यापि बाधायोगात् · नचात्र श्रुत्या
दिभिरिव लिङ्गादीनां मूलोच्छेदेन अतिकल्पनाविरोधाद्बाधसम्भवः सामान्यशास्त्रस्यापि प्रत्यक्षत्वाज्जन्मा
त्रेणाहोमान्तरोद्भवपदहोमे व्याहवनीयसिद्धेः · अतोत्र सामग्रीनिरोधसंभवात् · प्रमेयविरोधादेव बाधो
ऽङ्गीकर्त्तव्यः शक्तिमात्रे च प्रमेये विरोधाभावान्न बाधः सिद्ध्येत् · एवमुत्पन्नानुत्पन्नाशिष्टनित्यनैमि
त्तिकादिष्वप्रसङ्गो दर्शयितव्यः · तस्मादवश्यमनुष्ठानविरोधेन शास्त्राविरोधोऽङ्गीकर्त्तव्यः · किंच न शक्ति
मात्रं भूतार्थकथनवद्विधिना बोध्यते · प्रवर्त्तनारूपो हि विधिरर्थात्समीहितसाधनशक्तिं बोधयति · प्र
वर्त्तनाच्चाशक्यविषया न संभवतीति स्यादेवाप्रामाण्यम् · यदा तु समीहितसाधनत्वेव विध्यर्थ इत्याश्री

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इयं व्रीहियवादिवदित्युक्तम्· अथवा श्रुतिस्मृतिप्रमेयेन मिथो विरुद्धेनैतेन हि व्रीहिशक्त्या यवशक्ति विरुध्य
ते सा वा तया स्वशक्त्या बाध्येत न शक्तिः सा वा तु या शक्ति मात्रं च विधेः प्रमेय अतो वा नु मानस्य प्रत्यक्षेणावि
रोधाद्विरुद्धानामपि प्रामाण्यम् इति प्राप्तेऽभिधीयते । अप्रामाण्यं विरुद्धानाम् अशक्यार्थविधानतः· औदुम्बरीं न
शक्नोति सर्वां वेष्टयितुं स्पृशन् । वेष्टितां वापि संस्पृष्टुम् अतोऽन्योन्यविरोधतः प्रमेयापहृतेरेव बाधः स्याद्
द्विशेष्यवत्· अशक्यार्थविषयता हि मूढो भिक्षिक्षम प्रामाण्यनिदानं विधीनां सागरं तरेदित्यादिवदश
क्यं च स स्पृशन्नावेष्टयितुं वेष्टयतो स्पृष्टुं वा· अतो वेष्टयेत्स्पृशेदिति अशक्यार्थविधानान्न तावदुभ 15
योरपि प्रामाण्यं संभवतीत्यवश्यमवश्यमन्यतरद्बाधितव्यम्· ननु शक्तिमात्रं विधेः प्रमेयं स भवति
वाननुष्ठीयमानयोरपि शक्तिरिति सत्यप्यनुष्ठाननिरोधे प्रमेयभूतशक्त्याविरोधादुभयोः प्रामाण्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तरग्रह रागादि विषय श्रुतिवदिति प्रत्यक्षेणापि स्पर्शविधिना सर्ववेष्टन श्रुतिविषयमनुमानं न शक्यं निराक
र्तुं कथं तर्हि श्रुतिलिङ्गादिषु पूर्वपूर्वेणोत्तरोत्तरस्य बाधः तत्रापि श्रुतिद्वयसम्भवान्न उक्तप्रयाकल्पा निराकर्तुं
शक्यते उच्यते नैवात्र प्रमेयापहार निबन्धनो बाधः किन्तु कल्पनामूलोच्छेदात् यावद्धि सन्नाम्नानमनव
प्र गतप्रयोजनं करणीचाकृतार्थस्तावदेव नास्ति सिद्धमर्थं श्रुतिकल्पनमप्रमाणवत् यदा तु उक्तप्रश्रुत्या द्वयोर
पि नैराकांक्षं तदा मूलोच्छेदादनुमानविरोधः स्यात् यदि परं प्रमेयापहारादग्नाविवशैत्यानुमानं प्रत्य
क्षेण विरुध्येत न चैवं सम्भवति श्रुतिद्वयसम्भवात् अग्नौ हि शैत्योष्ण्येन सम्भवः परस्परोपमर्दकत्वात्तयोः
अतः प्रत्यक्षेण ह्यन्येनत्रौष्ण्यस्यापहृतत्वान्न तद्विषयमनुमानमुदेतुमुत्सहते अत्र तु सम्भवत्सिद्धमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नवेयर्थ्यमतः स्मृतयः प्रमाणमिति सिद्धम् ॥ विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम् ॥ उक्तस्य स्मृतिप्रमा-
णस्यापवादः क्रियते अत्र प्रत्यक्षश्रुतिविरुद्धाः स्मृतय उदाहृत्य चिन्त्यन्ते किं प्रमाणं वेति तदर्थं च पूर्ववदेव
श्रुतिमूलत्वं भ्रान्त्यादिमूलत्वं वेति चिन्तनीयम् तत्र पूर्वाधिकरणसमन्यमिह पूर्वः पक्षः । न च प्रत्यक्ष-
श्रुतिविरोधात्स्मार्त्तश्रुतिकल्पनानवक्लृप्तिः द्वयसंभवाद्व्रीह्यादिश्रुतिवत् । यत्र हि द्वयोरसंभवस्त-
त्रैकविषयेण प्रत्यक्षेणेतरविषयमनुमानम् प्रमेयापहारादनायासेनानिराक्रियते । व्रीह्यादिव-
द्वा त्वानुमानम् । यत्र तु द्वयसंभवस्तत्र शीघ्रप्रवृत्तमपीतरन्नेतरस्य विषयमपहरतीति तद्विषय- 16
मनुमानं शक्नोति प्रतिषेद्धुम् । संभवच्च युगपदनुपसंहरणीयार्थमपि श्रुतिद्वयं व्रीहियववद्दृष्टम्

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यते ।। वैदिकैः स्मर्यमाणत्वात्तत्परिग्रहदार्ढ्यतः । संभाव्य वेदमूलत्वात् स्मृतीनां वेदमूलता । य एव हि वेद
स्थे वधर्ममूलता नान्यस्येत्यास्थितानामन्वादयस्तेषामष्टकादिषु धर्मत्वस्मृतिर्न कथंचनोपपद्यते. नयदि
वेदमूलता तथा वैदिकानामेवाविगीतपरंपरया परिग्रहो वैदिकत्वस्मरणं च शिष्टानां सति वेदमूलत्वे
वकल्प्येत सम्भवति च त्रैवर्णिकानां वेदसंयोगः इति तन्मूलत्वमेवाध्यवसीयते कथमनुच्चारितानां मू
लत्वोपपत्तिरिति चेन्न स्मर्यमाणत्व एव स्मृतिमूलस्मृता. अनयः संप्रत्यपि विप्रकीर्णाः काश्चित्काचि
त्कस्यांचिच्छाखायां विप्रकीर्णाश्चाखान्तराध्यायिभिः शाखान्तरगतानामन्येषां लम्भाच्चादर्शना
र्थवन्निबन्धनम्. उपलंभेऽपि वा मन्दधीभिरनुपसंहरणीयानामुपसंहारफलं स्मृतिप्रणयनमिति.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चिदपिश्रुतिसद्भावनिश्चयोलैङ्गिकोलभ्यतेलिङ्गादीनितुश्रुतिसद्भावंकल्पयन्तीत्युक्तोविशेषः।तेनयदि
पूरकीयेराज्ञानेनप्रागेवार्थनिश्चयः।ततोर्थस्मरणपरंपरयार्थस्यैवानुमानान्नश्रुतिसिद्धिः।अथस्मृत्यन्तर
मेवमूलंस्यात्अन्धपरंपरयाचरूपनिश्चयस्तदास्यात्चैत्यवन्दनादीनामपिपुंवाक्यपरंपरयाधर्मा
नुमानंस्यात्।अथमूलानुसन्धानापेक्षंततोयथैववयंमानवीयात्स्मरणात्मनोरथविषयंश्रुतिवि
षयंवाज्ञानमात्रंकल्पयित्वाश्रुतिसद्भावमनिश्चित्यतन्निश्चयायमनोः।श्रुतिसद्भावमूलंप्रमाणंमृगयाम 17
हे।तथामनुरप्यन्यस्यसोप्यन्यस्येतिनश्रुतिसद्भावसिद्धिः।एवमुभयथापिश्रुतिर्नित्यानुमेयानसिध्य
तीतिनतन्मूलत्वेनप्रामाण्यंस्मृतीनाम्।अतःश्रुत्यामानाविरुद्धार्थितस्मृतीतिप्रामाण्यमितिप्राप्तेभिधी

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यमष्टकाकर्त्तव्यतां वेदे ऽपेतावत्प्रथमं कल्प्यते न श्रुतिस्वरूपं नापि श्रुतिज्ञानम्। एवमर्थज्ञाने स्मृतिकारस्य क
स्मृ.टी. ल्पिते पश्चाज्ज्ञानलिङ्गाज्ज्ञेयाभूतार्थानुमानेन श्रुतिकल्पनम्। एवं स्मृतिकारस्यापि स्मृत्यनन्तरलिङ्गा
दर्थस्यैवानुमानमिति निष्प्रमाणिका श्रुतिकल्पना स्यात्। अथोच्येत नावश्यं परकीयेण ज्ञानेन रूटि
त्येवार्थनिर्णयः मूलानुसन्धानसापेक्षत्वात्। तत्र यदि स्मृतिकारस्यार्थविषयज्ञानं मूलमनुसंदधानः
स्मृत्यन्तरमेव संभावयेत् तदपि च ज्ञानस्यैव लिङ्गं नार्थस्य एवं ततः पूर्वतरमपि स्मरणं ज्ञानस्यैव लि
ङ्गं नार्थस्येति न कश्चिदर्थनिश्चयो लैङ्गिको लभ्यत इति श्रुतिरेव कल्पयितव्या। यद्येवं श्रुतावपि तुल्य
मेवैतत् स्मृतिकारस्य मूलं तया श्रुतिज्ञानमेव प्रथमं कल्प्यते न श्रुतिसद्भावः श्रुतिविषयेण तु ज्ञाने
न ज्ञेयभूतश्रुतिविनिर्णयः परज्ञानेन च तद्विषयश्रुतिनिश्चयो मूलानुसन्धानसापेक्षः। मूलं च स्मृति
कारस्य स्मृत्यन्तरमेव तदपि चार्थज्ञानद्वारेण श्रुतिज्ञानस्यैव लिङ्गं न श्रुतिसद्भावस्येति न कश्चित्कस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शाखं वाहुल्यमित्यादि शाखापरिमाणस्य परंपरया सर्वलोकस्मरणान्नाधिकाशाखाभावाच्चिरंतनवचने· ना
धिपठ्यमानानां मत्पन्नावहिताध्येतृकाणां मध्ये कासांचिच्चोदनानामुत्सादसम्भवः नचसंप्रत्यपिपठ्य
मानएव विप्रकीर्णाः स्मृतिमूलभूताः अतएव शिष्टोक्तं स्मृतिप्रणायनं सर्वेयथार्थादित्युक्तं तत्रतावदिदानीमती
तकाले वा पठिताः श्रुतयः स्मृतीनां मूलम्· नापि नित्यानुमेयाः अन्धपरंपरन्यायात्· नहि चोदनानकदा
चिद्दृश्यतेतस्याः सर्वपुरुषप्रत्यक्षादिप्रसरभावाद्बलेनतस्मात्तिलम्· ननुस्मृतिर्लिङ्ग· वशेनानुमानं प्र
मरत्येव· सर्वेषां लिङ्गादिकल्प्यास्विवश्रुतिषु· विषम उपन्यासः लिङ्गादयोहि सर्वपुरुषप्रत्यक्षाः श्रु
तिमन्तरेणानुपपद्यमाना युक्तं पत्रस्यां निश्चयमादधति स्मृतिवाक्यरचनातु पौरुषेयी यदर्थविष 18
योपलभ्यते तद्विषयमेव रचयितुर्ज्ञानं कल्पयति· अष्टकाकर्त्तव्यताविषयं च स्मृतिवाक्यमिति नूनम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रा. ५८ मुतनेतिविचार्यते· तदर्थं च श्रुतिमूलत्वमेषां भ्रान्त्यादिमूलत्वं वेति विचारयितव्यम्· तत्र प्रायेणानृतवादित्वात्पुंसां भ्रा
न्त्यादिसंभवात्· चोदनानुपलब्धेश्च शङ्कामात्रात्प्रमाणानां सम्भवद्भ्रमविप्रलम्भेषु पुरुषेषु न तावन्निर्विचिकित्समेव प्रामा
ण्यं स्वव्यवसानं अतश्चाननुष्ठानात्मूलतोऽप्रामाण्यमेव· किंच तेषां प्रत्यक्षादिमूलत्वेन प्रामाण्यं तेषां धर्माध
र्मयोरप्रवृत्तेः· न च स्वातन्त्र्येण वेदवत् पौरुषेयत्वात्· न चोदनामूलत्वेन· तेषामनुपलम्भात्· न ह्यनुपल
भ्यमानाश्चोदनामूलत्वेन स्वप्रमेयं प्रतिपादयन्ति· न चासां प्रत्यक्षेणोपलम्भसंभवः· अनुच्चार्यमाणत्वा
त् उच्चार्यमाणत्वे वा स्मृतिप्रणयनवैयर्थ्यं· प्राक् पठिता अपि संप्रति पुरुषक्षयादुत्सन्ना इति चेत् न वि
कल्प्यासहत्वात्· योद्युत्साहं चोदना नाववदति स वक्तव्यः· किमेका काचिच्छाखास्मान्नेश्रुतिसंघातोत्थि
कापूर्वमासीत्सेदानीमध्येतृक्षयादुत्सन्नेति कल्प्यते· किं वा बह्व्योऽशाखा स्थितास्ततः श्रुतयः स्मृति
मूलभूताः पठिताः संप्रत्युत्सन्ना इति· तत्र सहस्रसामशाखाः· एकशतमध्वर्युशाखाः एकविंशति

रात्रिर्देवतेति तदपेक्षस्य मन्त्रस्य तदप्रामाण्यात् अप्रामाण्ये न तत्सामान्यादितरेषु तथात्वमिति सकलस्य वेदस्या-
प्रामाण्यं तेन वेदप्रामाण्यसिद्ध्यर्थं स्मृतिप्रामाण्यमिति संगतिः। ननु देवं यदि स्मृतेरप्रामाण्यं तदा मन्त्रस्यानर्थक-
त्वे किं प्रमाणं न तावल्लिङ्गं तस्य सामान्यसम्बन्धसापेक्षत्वात्। नापि स्मृतिवाक्यं तस्याप्रामाण्यात्। यद्यपि
लिङ्गमात्रं विनियोजकं स्यात्तथापि पृथक् न वदङ्गत्वेन फलस्य विनियोगात् स्मृत्यप्रामाण्ये च स्मार्तस्य कर्मणः
फलवत्त्वाभावात् तादर्थ्यं मन्त्रस्य येन सापेक्षता स्यात्। यद्यपि च मन्त्राप्रामाण्ये सफलत्वस्याप्रामाण्य-
कृतत्वम्। नहि मन्त्रस्य स्वारसिकं प्रामाण्यं येन शब्दमात्रे स्यात् अपि तु सापेक्षैकवाक्यताकृतं। न च दृष्ट-
त्वस्य तदस्तीति कथमप्रामाण्यं प्रतिपाद्यत इति। न चैवं चोदनैव प्रतिज्ञाव्याकोपः तन्मूलत्वेन तद- 19
नभिधेनैवेतरेषां प्रामाण्यात्। स्यान्मन्त्रेण प्रामाण्याभावात्। तदिह किं स्मृत्याचाराणां धर्मे प्रामाण्यं

श्रा.दी. परिसंख्यायामयशोऽक्केशः स्यादिति। अत्राभिधीयते। यस्यादृष्टं तु लभ्येत तस्यान्तस्यादृष्टकल्पना। अत्रच्छेपस्तु तेष्वेह मन्त्रो १ अध्याय २ पाद
च्चारणसामर्थ्यात् स्मरणं च प्रयोगार्थं प्रयोगाच्च फलोदयः। एवं दृष्टार्थतालाभान्नादृष्टपरिकल्पना। यस्तु मन्त्रेणैव स्मर्त
व्यमिति नियमः तस्य न किञ्चिद्दृष्टमस्तीत्यदृष्टं कल्प्यते मन्त्रोच्चारणस्य तु दृष्टेनैवार्थवत्त्वात्तत्रानुपपत्त्येकशरणमदृष्ट
कल्पनमनवकाशं तदर्थशास्त्रादयोपि गुणार्थवादपरिसंख्यादिभिः परिहृताः तस्मात्प्रकाशनेनैव मन्त्राणामुपका
रिताऽपूर्वनियमादेवत्वदृष्टपरिकल्पनम्॥ इति शास्त्रदीपिकायां प्रथमस्याध्यायस्य द्वितीयः पादः॥ ॥धर्मस्य
शब्दमूलत्वादशब्दमनपेक्षं स्यात्. कथं लक्षणको धर्म इत्येतदिह लक्षणार्थ इत्युक्तं न च प्रथमे पादे चोदनानां
प्रामाण्यं सिद्धं द्वितीये त्वर्थवादादेः एवं ध[illegible]स्यनेदस्य प्रामाण्यमप्रामाण्ये पि स्मृतीनां न विहन्यते. तथापि
किं लक्षणो धर्म इति जिज्ञासाधिकारात्स्मृतिप्रामाण्यं लक्षणे संगतं. नन्व प्रामाण्ये स्मृतीनां वेदस्यापि तत्सा
पेक्षत्वादप्रामाण्यं स्यात्. यांजनाः प्रतिनन्दन्तीत्ययं मन्त्रो रणचिद् वत्यक मांऽऽत्वेन प्रतीयते. स्मार्तेच कर्मणि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नार्थवत्त्वया भवितव्यमित्येतावत्यर्थे सिद्धे कथं तत्पर्यवसानायेदानीमर्थविशेषश्चिन्त्यते· तेषां च क्रमप्रक
रणाभ्यां क्रत्वङ्गत्वं भवत् किं दृष्टेनैवार्थप्रकाशनेन भवति किं वोच्चारणमात्रेणादृष्टं कुर्वतामिति· तत्र यदि दृष्टा
र्थत्वैव स्यान्मन्त्राम्नानमनर्थकम्· प्रत्यायनाद् दृष्टं चेत्तदुच्चारणेतो वरं शक्यानुपायान्तरेणापि प्रयोग
वेलायामर्थप्रकाशनं तथादितावन्मात्रमेव कार्यं मन्त्राणां स्यान्नित्यवदाम्नानमनर्थकं स्यात्· अथ तु म
न्त्रप्रत्यायनाद् दृष्टं कल्प्येत ततोऽपदूरमपि गत्वा कल्प्यमदृष्टं तदुच्चारणादेव कल्प्यमिति युक्तं तद्धि पु
रुषव्यापारगोचरः प्रत्यायनं तु तस्मिन्ननुतिष्ठति स्वयमेव भवति स्वव्यापारे च पुरुषो नियुज्यते यत्र
नियुज्यते तत्र फलाकाङ्क्षा· तेन यावदवश्यंभाविनी अदृष्टकल्पना सा तत्रैव युक्ता ननु तस्य प्रत्यायनार्थ 20
त्वं प्रत्यायनं चादृष्टार्थमिति युक्तम्· तस्माददृष्टार्था मन्त्राः तथा च तदर्थशास्त्राद्युपपत्तिः इतरथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६ निर्देशः प्ररोचनार्थत्वेयुक्तो भवति नहि भूते भाविनि वा तादृशी प्रवृत्तिर्भवति यादृशी वर्त्तमाने तेन स्तुत्यर्थत्वेन लक्षणया वर्त्तमान + ६

न सिद्धेः श्रूर्पेण जुहोतीत्यस्य वाक्यस्यानुवादः तेनेदृशमिदं वाक्यजातमित्येकदेशिनिष्पन्नं श्रूर्पस्य होमसाधनत्व
मन्त्रकरणत्वात् हेतोः अतः श्रूर्पमन्यच्छायदन्त्रकरणं तेन होतव्यमिति पूर्वपक्षः । सिद्धान्तस्तु श्रूर्पस्यार
नीययाश्रुत्याकरणत्वं गम्यते न तदानुमानिके द्विविपूर्वकरणादिभिर्विकल्पितुमर्हति । न च वेदेनोच्यमा
नं श्रूर्पस्य होमसाधनत्वं हेतुमपेक्षते वैदिकस्यैव तत्र प्रमाणत्वात् अर्थवादत्वमपेक्षितः प्ररोचनार्थत्वे
न । तस्मादर्थवादत्वं । एवं चाप्रसिद्धस्याप्रिवचनकल्पनाक्लेशो न भविष्यति क्रियते इति चावर्त्त
मानेपवर्त्तमानैर्निर्देशो युक्तः विध्यर्थत्वेन निष्प्रमाणकं लक्षणाश्रयणं । न च श्रौतेन वर्त्तमाना
न्नक्रियेण मुख्यान्तकरणेन चशक्यते होमः कर्त्तुं तस्मादर्थवादत्वम् ॥ तदर्थशास्त्रात् । गतो ऽर्थवा
दप्रसङ्गः । मन्त्रोविदानीं चिन्त्यते । तेषाम् ध्याधेः विकरणे आनर्थक्यमात्रं क्यस्वाध्यायविधिवशे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७

हेतुर्वा स्यादर्थवत्त्वोपपत्तिभ्याम् ॥ एवमानर्थक्यप्रतियोगिनो विधिप्रतियोगिनश्चार्थवादा विचारिता
इदानीं हेतुप्रतियोगिनो विचार्यन्ते । एवं श्रूयते । शूर्पेण जुहोति तेन ह्यन्नं क्रियत इति तत्र सन्देहः किं
शूर्पेण होमे कर्तव्ये ऽन्नकरणता हेतुः उतार्थवाद इति । तत्र हि शब्दश्रुत्या हेतुत्वं गम्यते तेन लक्षणाया
प्रासरस्य अनर्थकप्राप्यश्चार्थवादः हेतुस्त्वर्थवान् कः पुनरर्थो हेतोः येन येनान्नं क्रियते शूर्पाद
न्येनापि दर्वीपिठरादिना तेनापि होमसिद्धिर्हेतोः प्रयोजनम् । कथमसिद्धायां व्याप्तौ हेतुत्वव्यप
देशः अत एव हेतुनिर्देशाद्व्याप्तिमन्तरेणानुपपद्यमानाद्व्याप्तिवचनं कल्प्यते येन येना 22
न्नं क्रियते तेन तेन होतव्यमिति । तेन वचनेन सर्वान्नकरणविधायिना शूर्पस्यापि होमसाध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नेनानिर्विकल्पकं नाम किञ्चिदस्तीति मन्यन्ते। तदनुपपन्नमिति विरुद्धं प्रतीमो हि वयमक्षसन्निपातानन्तरं · अविविक्तसामान्यविभा
गं संमुग्धं वस्तुमात्रगोचरमालोचनज्ञानं तदभावे विकल्पस्यैव न जायेत विकल्पयता हि पूर्वानुभूतं जातिविशेषसंज्ञाविशेषं चानुस्मृत्य
ते न पुरःस्थितं वस्तु विकल्पयितव्यम् · न चार्थमदृष्ट्वैव तत्स्मरणमाकस्मिकमेवोत्पद्यते · तस्माद् अस्ति निर्विकल्पकमपि ज्ञानं तत्त
सन्मात्रविषयमिति केचित् · भेदस्य विकल्पवेद्यत्वात् तच्च हि तेच भेदे विशेषाणामग्रहणात् · किं च · इतरेतराभावो भेदः · न चाभा
सो प्रत्यक्षेण ग्राह्यते ग्रहीतुं न तरां निर्विकल्पेन · अतश्च नेह नानास्ति किंचनेत्यादीनां नानात्वनिषेधानां प्रत्यक्षविरोधाभावा
देकमेवाद्वितीयमित्यादिश्रुतिभिरद्वितीयं ब्रह्म सिद्धं · तदिदमतिसाहसं · किं भवतो नीलपीतयोरस्ति तिक्तमधुरयोः शीतोष्णयोः सुखदुः
खयोश्चाविलक्षणबुद्धिः · यद्येवं नानयोरन्तरं वक्तव्यं · न च सविकल्पके न विशेषग्रहणमिति वाच्यम् · अविकल्पके न विकल्पक
स्यापि विलक्षणोत्पत्त्यसंभवात् यद्यो[illegible]भेदेयमिदमस्माद्भिन्नमित्येवं विकल्पेनैव भेदो गृहीतव्यो नाविकल्पेन तस्याग्रहणं संभ
वतीति न ब्रूमो भेदस्य ग्रहणमपि तु भिन्नानां तेषामपि नाभिन्नतया किं तु स्वरूपेण यदन्यस्माद्भिन्नं नीलं पीतं वा गृह्यते इति ब्रूमः

यते· नचासावन्यसंसर्गकृतः प्रमाणाभावात्· अभिन्नोपसंसर्गयोग्यस्यापि सामान्याकारस्याभिलापलिङ्गादिभिरवेद्यत्वं· इन्द्रिये
श्च वेद्यत्वमुपपद्यत एव· न ह्ययं परोक्षापरोक्षविभागो विषयकृतः। यदि हि तथा स्यात् सर्वदैव सामान्यं परोक्षं स्यात्· न चैवम
स्ति सामान्याकारेऽपि परोक्षापरोक्षविभागदर्शनात्· तथा हि· दूरस्थं तं स्वलक्षणं परस्परानिर्धारितगवाश्वभाति विशेषो
हेयारवंश्ववशाद्भवत्वं तस्मिन्नेव स्वलक्षणे नु भिमानोऽपि परोक्ष्यं बध्नते· वदति ह्यश्वोऽपि अयं न चक्षुषा तथावभास
ते इति· प्रत्यासन्नस्तु वदति संप्रत्ययश्वत्वमस्य चक्षुषा परिपश्यामि न पूर्वमिति· स्वलक्षणेनुषा गापि विशदमेवेति सामान्या
नोगत एवायं दूरसमीपवर्त्तिनः परोक्षापरोक्षविभागः· तस्मात् कारणकृतोऽयं विभागः· एकस्मिन्नपि हि विषये क्षे
जीयमानमपरोक्षं जायते लिङ्गादिजनितं तु नेति किं नोपपद्यते· ज्ञानजन्योऽपि विषयगतः फलविशेषोयमपरो 22
क्षं नाम सर्वस्वसंवेद्योऽयं शब्दाभावाभ्यां लिङ्गाभ्यां मक्षैः पश्यामि न पश्यामीति विस्फारिताक्षाणामेव व्यवहारः
प्रवर्त्तते अतोऽस्ति विकल्पस्यापि विशदावभासत्वमिति प्रत्यक्षतोपपत्तिः· केचित्तु· सविकल्पकमेव सर्वविज्ञा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रा· दि·
२९

ञ्जतमर्थापत्त्या· सामान्यतोदृष्टेन वा· ननु विकल्पनिमित्तं सम्बन्धग्रहणं· तत्कथं प्रत्यक्षपूर्वकत्वं· सविकल्पकमपि अ
नुपरतेन्द्रियव्यापारस्य जायमानम् अपरोक्षावभासत्वात् प्रत्यक्षमेवेत्यदोषः· स्वापरोक्षावभासश्चेति चित्रं· अपरोक्षमिति हि
स्वलक्षणाभिमुख्यते· तद्विषयोवभासोपरोक्षावभासः· विकल्पस्त्वभिलापसंसर्गयोग्यप्रतिभासत्वान्न स्वलक्ष
णं स्पृशति· नह्यभिलापाः स्वलक्षणं स्पृशन्ति· यदि स्पृशेयुरभिलापमात्रेणापि विना [illegible]क्ष[illegible] व्यापारमपरो[illegible]
क्षावभासः स्यात्· नचासावस्ति· तदुक्तं अन्यथैवाग्निसंयोगाद्दाहं दग्धो हि मन्यते· अन्यथा दाहशब्देन दाहार्थः संप्रती
यते वा इति· तस्मादभिलापास्तावन्नाविशदमाकारमवभासयन्ति· तत्समानविषया अपि विकल्पाः· यस्त्वयं वि
स्फारिताक्षस्य गौरयमिति विकल्पाविशदावभासः स समानकालविषयावभासनिर्विकल्पकसंसर्गकृतः· तद
भावे अभिलापमात्रे अनुमाने च विकल्पाकारप्रतिभासे वैशद्याभावात्· तस्मान्निर्विकल्पकमेव प्रत्यक्षं तत्रैव
हि विकल्पस्य स्वलक्षणस्यावभासः· नैवमुन्मीलितनेत्रस्य विकल्पोपि गौरयमित्यपरोक्षावभास एव प्रती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्ष्महे। ननु पृथिव्यादीनामन्यतमात्मकं तेभ्योऽन्यद्वा सर्वथाभावदिति मनः। तथात्मतद्गुणोऽस्त्वेव स्वतन्त्रं प्रवर्त्तते न वा बाह्ये-
रूपादिष्वित्यान्तरमित्युच्यते। रूपादिज्ञानेष्वपि तच्चक्षुरादिसहायं प्रवर्त्तते। एवमनुमानादिष्वपि लिङ्गादिसहायमन्य-
मनस्कस्य संप्रयुक्तेष्वपि रूपादिषु ज्ञानानुत्पत्तेः। स्मृतावपि संस्कारपरजन्यं प्रवर्त्तते न स्वतन्त्रम्। ननु अनुमानादीनां
मनोजन्यत्वात्तेषां च भूतभविष्यतोरपि प्रवृत्तेरिन्द्रियजत्वं विद्यमानोपलम्भकत्वेनानैकान्तिकं स्यात्। न स्यात्। न हीं-
न्द्रियजत्वं हेतुः किन्तु इन्द्रियसंप्रयोगजत्वं हेतुः न चानुमाने तीतायां भविष्यन्त्यां वा वृष्टावनुमीयमानायां मन-
सा मनसा संप्रयोगोऽस्तीति अव्यभिचारः। तदेवं प्रत्यक्षं तावदनिमित्तं तत्पूर्वकत्वाच्चानुमानाद्यपि। न गृहीते-
धर्मे तेन सह कस्यचित्सम्बन्धग्रहणं संभवति। सादृश्यविषयत्वाच्चोपमानं दूरभ्रष्टम्। अर्थापत्तिरपि धर्मेणावि-
नानुपपद्यमानस्य कस्यचिददर्शनादसमर्था। ननु जगद्वैचित्र्यमनुपपन्नं न स्वाभाविकत्वेनोपपत्तेः। यद्यपि
तदनुपपत्त्या किञ्चिददृष्टं कल्प्येत तथापि को धर्म इति विवेकाभावादवश्यं चोदनैव प्रार्थनीया। सा चेदङ्गीकृता

23

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रोक्षावभासस्य ज्ञानस्येन्द्रियाधीनतया रूपादिज्ञानेषु देशकालादिष्वव्याप्तिदर्शनात्सुखादिविषयमपरोक्षज्ञानमिन्द्रियम
नुमापयति। तच्च चक्षुरादीनामसम्भवात्तेभ्योऽन्यदवतिष्ठते· अत्र कश्चिन्नित्यद्रव्याविशेषगुणत्वात्सुखादीनां द्रव्यान्त
रसंयोगजत्वं पार्थिवपरमाणुगतरूपादीनामग्निसंयोगजत्वादर्शनात्· यच्च द्रव्यान्तरं तन्मनइत्याह· तदयुक्तम्· श
रीरं भोगायतनम्· किंच तस्य भोगायतनमन्यत् संयोगापेक्षसुखाद्युत्पत्तेः· अशितपीताद्याधारत्वोपचनवाहिः शरी
रात्सुखाद्युत्पत्तिः। अतः शरीरसंयोगादेवासिद्धेर्न द्रव्यान्तरानुमानम्· किंच पार्थिवगुणानामेव द्रव्यान्तरसंयोगापे
क्षा न द्रव्यमात्रगुणानाम्· तेजःसंयोग एव च कारणतया दृष्टो न द्रव्यमात्रसंयोगः। तस्मान्नैवं मनःसिद्धिरिति सुखा
द्यपरोक्षज्ञानं लक्षयति तदिन्द्रियमुच्यते· तच्च द्विविधम्· बाह्यमाभ्यन्तरं च· बाह्यं पञ्चविधम्· घ्राणरसनचक्षुस्त्वक्श्रो
त्रात्मकम्· आभ्यन्तरं त्वेकं मनः· तत्राद्यानि चत्वारि पृथिव्यप्तेजोवायुप्रकृतीनीत्यक्षपाददर्शनादभ्युपगम्यन्ते श्रो
त्रं त्वाकाशात्मकं तैरभ्युपगतम्· वयं तु ब्रूमः· श्रोत्रमिति दर्शनाद्धि आगमे व[illegible]कर्णशष्कुल्यवच्छिन्नं श्रोत्रमा

३ वभासएव मनसोलिङ्गम्· किं पुनरिन्द्रियलक्षणं· चक्षुरादिषु मनसि वानुस्यूतं उच्यते· यत्संप्रयुक्तेऽर्थे विशदावभासंवि·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तेन तं धार्मिक इत्याचक्षते । किन्त्वधर्मान्निर्दिश्यत इत्येतावन्तराहुः । लोके सिद्धस्य च लक्षणं परीक्षकैर्वक्तव्यं न द्रव्यादिव
त्परिभाषणमित्यास्तां तावत् ॥ ॥इति चोदनासूत्रम् ॥ ॥तस्य निमित्तपरीष्टिः ॥ अनेन सूत्रेण चोदनारूपस्य निमि
स्य त्तपरीक्षणमस्मिन्न्याये वक्ष्यमाणमथातः शेषलक्षणमथ विशेषलक्षणमितिवत् सुखग्रहणार्थमनुकीर्तितं । स
त्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात् । चोदनैवेत्यस्य साधनाय प्रत्य अर्थस्य ४
क्षादीनामनिमित्तत्वमुच्यते । प्रत्यक्षं तावदिन्द्रियार्थसंयोगजन्यत्वेन विद्यमानोपलम्भत्वाद्भविष्यति धर्मेऽनि न
भा मित्तम् । सत्संप्रयोगजन्यत्वमासेखापि तत्स्वरूपत्वाल्लक्षणमिति नैयायिका ब्रुवते । तन्न लक्षणानभिधानाद्दू द
षणम् । नहीदं लक्षणं प्रत्यक्षस्य । किन्त्वनिमित्तत्वकथनमात्रम् । तत्र हेतुर्विद्यमानोपलम्भनत्वम् । तत्साधनं च
सत्संप्रयोगजत्वम् । नहि सत्संप्रयोगजमविद्यमानोपलम्भनं भवति । इन्द्रियार्थसंयोगजत्वं तु सुखादिज्ञानेऽव्य
व्याप्तेरहेतुरिति चेन्न । तेषामपि मनःसंज्ञकेन्द्रियसंप्रयोगजत्वात् । मनःसंज्ञावे सुखादिज्ञानमेव प्रमाणम् । अप

24

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यस्य बाधः। विधौ तु अपूर्वजनके सत्यग्नीषोमीयहिंसापि प्रतिषिद्धेत। किमर्थं च श्येनस्य विधेयत्वं निराक्रियते। प्रतिषेधसिद्ध्य
र्थमिति चेत्कः प्रतिषेधो न हिंस्यात्सर्वा भूतानीति। नायं निषेधः। श्येनेऽप्रवर्तने हिंसाविषयत्वात्। श्येनफलं हिंसा न
श्येनः। तथा चोक्तम्। यो हि हिंसितुमिच्छन् श्येनस्यायमभ्युपगम इति हितेषामुपदेश इति। कश्चित्त्वाह श्येनस्य कर्तव्य
त्वे सति बलात्तत्फलमपि हिंसा कर्तव्या भवतीति न निषेद्धुं शक्यते। अतः फलकर्तव्यतानिरासार्थं श्येनकर्तव्यताव
त्वान्निरस्यते इति। तदिदमसंबद्धम्। यथैव हि श्येनापूर्वस्य कर्तव्यतायां सत्यामपि तत्साध्यफलस्य कर्तव्यता न प्रसज्यते। तद्व
थायागकर्तव्यत्वे सत्यपि रागप्राप्तस्य फलस्य नास्ति कर्तव्यतापत्तिः। तस्मादनर्थकं श्येनकर्तव्यतानिराकरणम्। त
स्माद्धिंसैवात्र प्रत्युदाहरणम्। इदं चापरमेकदेशिनः पृष्टव्याः। अर्थशब्देन किमुच्यते इति। यदि श्रेयःसाधनं नित्या
नां धर्मत्वं न स्यात्। अथ यन्निर्निमित्तफलं भवति तदर्थशब्देनोच्यते। तथा सति नन्वर्थविषयस्यापूर्वस्य धर्मत्वप्रसङ्गः।
चोदनालक्षणत्वान्निषिद्धफलाभावाच्च भवत्विति चेन्न। लोकविरोधात्। यो हि हिंसायामुद्युक्तः प्रतिषेधवशान्निवर्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रागोद्दिष्टस्य प्रतिषेधः क्रियते ततः स्यादपि वैरूप्यं प्रतिषेध्योपस्थापितक्रतुपुरुषयोर्गोचरत्वात्प्रतिषेधस्य। यदा तु हिंसामात्र
मुद्दिश्य प्रतिषेधः क्रियते तदापि वैरूप्यम्. तद्यथा भोजनार्थमांसोत्पादने हिंसायाश्च वैरिनिपातनार्थतयोः साक्षा
त्पुरुषार्था तस्यामुभय्यामविशेषेण प्रतिषिध्यमानायामपि नास्ति वैरूप्यम्. एवमिहापि. इतरथा तत्रापि भोज
नाङ्गता पुरुषार्थता च प्रतिषेध्यस्य स्यादिति वैरूप्यं स्यात्. तस्माद्येव काचिद्येन केनापि प्रकारेण प्रसक्ता हिंसा
सा सर्वा सामान्येन प्रतिषिध्यते. पुरुषार्थश्च प्रतिषेधो नारभ्याधीतत्वात्. तस्मादग्नीषोमीयहिंसाप्यसं
ति विधेयत्वे प्रतिषेधगोचरः स्यात्. विधेयत्वे तु विधेर्विशेषविषयत्वात्सामान्यविषयो निषेधस्तद्विरोधा
द्धिंसान्तरण एव लभते। ननु सत्यपि विधेयत्वे विधेः क्रत्वर्थत्वात्प्रतिषेधस्य च पुरुषार्थत्वाद्विषयभेदेनावि 25
रोधः। ज्योतिष्टोमविधिस्तु साङ्गं प्रधानं पुरुषस्य विदधत्पुरुषार्थहिंसाप्रतिषेधं अग्नीषोमीयहिंसायाम
वतरन्तं रुणद्धि. न चाग्नीषोमीयहिंसां वर्जयित्वा ज्योतिष्टोमः शक्यते ऽनुष्ठातुम्. तस्मादविरोध इति सामा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्न इति चोत्तरमपूर्वविषयं स्यात् । न च तस्य कर्तव्यत्वं शक्यते वा रचितुं कार्यस्वभावत्वात् । एवं यागकर्तव्यतानिषेधार्थमिदं भा
ष्यकृत्प्रयत्नः साधनायप्रयस्यते । कर्तव्यताविषयो हि नियोगो न पुनस्तस्य कर्तव्यता माहेति । तदपार्थकम् । काम्येष्वपि विधिरे
वप्रवर्तकः । न फलं तस्य विध्यधीनोत्पत्तित्वेन यागापेक्षाभावात् । विधिस्तु यागाधीननिष्पत्तित्वाद्यागमनुष्ठापयतीति पु
रुषम् । यदि च विधिः प्रवर्तकः काम्येषु स्यात् । इति कर्तव्यतार्थविधेया स्यात् । तस्यामपि फलं न त एव प्रधानसिद्धेः साङ्ग प्रधा
नसाध्यत्वात्फलस्य । वक्ष्यति हि तद्युक्तेन फलश्रुतिस्तस्मात्सर्वं चिकीर्षेमि । तत्तथाग्निषोमीयहिंसाया विध्यभावेन निषेधवि
षयत्वात्तद्युक्तस्य ज्योतिष्टोमस्यानर्थत्वापत्तेः । कोऽर्थो योनिःश्रेयसा ज्योतिष्टोमादिरिति भाष्यानुपपत्तिः । ननु न
हिंस्यादिति निषेधो नारभ्याधीतत्वात्पुरुषार्थः । तेनानेन पुरुषार्था एव हिंसाः प्रतिषेधव्याः । क्रत्वर्थप्रतिषेधेऽपि हिंसापि
क्रत्वर्था प्रतिषेद्धव्या स्यात् । अविशेषत्वे कस्य प्रतिषेधावयवेः क्रत्वर्थत्वापत्त्या वैरूप्यं स्यात् । तस्मात्पुरुषार्थानामेव हिंसा
नामिह प्रतिषेधो न क्रत्वर्थानामिति । तदिदं बालसंमोहनम् । न च विशेषेणापि प्रतिषेधे वैरूप्यं यदि हि क्रत्वर्थपुरुषार्थनिषेधे २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपपत्त्या स्वविषयस्य कर्त्तव्यतां बोधयन्ननुष्ठापक इत्युच्यते· श्येनादीनां तु रागादेवानुष्ठानसिद्धेर्न विधिस्तेषामनुष्ठानमाक्षिपती
ति न तेषां विधेयत्वम्· असति च विधेयत्वे तेषां निषेधविषयत्वादनर्थत्वमिति वभाष्यस्य र्थमर्थपदमिति· तत्रेदं वक्तव्यम्· कस्मिन्न
र्थे तेषां व्यावृत्तिः· धर्मत्वे इति चेन्न· तत्स्वरूपानभिधानात्· इदं हि सूत्रं वेदार्थस्य कार्यत्वं प्रतिपादनार्थं न धर्मस्वरूपलक्षणार्थम्· य
तः श्येनादीनां धर्मत्वमप्रसक्तौ दित्यर्थपदेन व्यावृत्तिः क्रियते· यदि परं कार्यत्वव्यावृत्तिः स्यात्सा चायुक्तेत्युक्तं प्राक्· भवतु वा धर्म
भेदाङ्गीकारेण धर्मलक्षणार्थं तथापि चोदनालक्षणपदेन कार्यात्मकमपूर्वमङ्गीकृत्य दिश्यते तस्य धर्मत्वमुच्यते इति वो मतम्· तद
स· श्येनादिपरास्य कः प्रसङ्गः· यस्मादित्यर्थं अर्थपदं स्यात्· न हि ज्योतिष्टोमादियागस्यापि धर्मत्वमस्ति· अपूर्वस्य धर्मत्वाभ्यु
पगमात्· अथ श्येनाद्यपूर्वस्यैव धर्मत्वमर्थपदेन व्यावर्त्यते· ततो भाष्ये श्येनादिशब्देन नामधेयेन तत्साध्यमपूर्वं लक्ष्यत इत्य
विशिष्टा लक्षणा स्यात्· यदि वापूर्वमेवोदाहरणं ततो हिंसा हीति भाष्यं नोपपद्यते· श्येनयागो वा तत्फलं वा हिंसा न त्वपू
र्वं कथंचिदपि हिंसापदास्पदम्· अस्मिंश्च पक्षे कथं पुनरसावनर्थः कर्त्तव्यतयोपदिश्यत इति चोदनैव श्येनादयः कर्त्तव्या विज्ञा

26

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२ग. ६८
९३

तस्माद्यागादिरेवश्रेयःसाधनरूपेण धर्मस्तद्रूपाभावाच्चन भूद्दुःकृतस्य धर्मतापत्तिः · चोदनालक्षणमात्रस्य धर्मत्वं माभू-
दित्यर्थः शब्देन विशेष्यते । चोदनाशब्देन च प्रवर्त्तकं निवर्त्तकं च वाक्यमुच्यते · तत्र च निषेधवाक्येन हिंस्यादित्यादिना
मा। ऽनर्थत्वेन लक्षणानां हिंसादीनामपि धर्मत्वं स्यात् तस्मादित्यर्थं यस्य वार्थरूपेण प्रवर्त्तकवाक्येन लक्ष्यते तस्यैव धर्मत्वं वक्तु-
मर्थग्रहणम् । भाष्ये च स्येनादिग्रहणं तत्साध्यहिंसादेर्लक्षणार्थम् · उपरि स्यादुद्धिसा हिं सा · हिंसा प्रतिषिध्यत इति च
निवर्त्तणात् केचित् · लक्षणपरिहरत्नः श्येनादिस्वरूपमेवार्थशब्दस्य व्यावृत्त्यमन्यन्ते · तेषामेव नैवश्येनाद
यः कर्त्तव्या विज्ञायन्त इति विधेयत्वनिराकरणेन प्रतिषेधविषयत्वसमर्थनात् । कथं पुनस्तेषां विधेयत्वं निरा-
क्रियते · तत्राहुः । यः स्यादि विधिः स्वसिद्ध्यन्यथानुपपत्त्याभावान्न स्वयमनुष्ठानमाक्षिपति · न तु कर्त्तव्यतावोधन
मेव प्रवर्त्तनम् · कर्त्तव्यता च वैदेया गस्यालिङ्ग्वबोधितेति कथमविधेयत्वम् । सत्यम् · न तु यागस्य कर्त्तव्यतालि-
ङ्ग न विधीयते स्वार्थस्य कर्त्तव्यतां लिङ्भिधत्ते · यागस्तु तस्य विषयः करणं च · सोयं कर्त्तव्यता त्मानिगार्थान्यथा

३× स्वयमनुष्ठानमाक्षिपति · तादृधेयमित्युच्यते · काम्येषु च कर्मसु कामश-
ब्दादेव प्रवृत्तिसिद्धेस्तत एवा विधिः सिद्ध्येन्न अन्यथानुपपत्त्या ×३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्थेन बोधकत्वाद्व्यभिचारेपि न बोधकत्वहानिः।। लिङ्गस्याव्यभिचारित्वादागमकत्वमिति व्यभिचारिणो लिङ्गत्वमनुपपन्नम्·
अथ चक्रुरप्रवृत्त्याव्यभिचारशङ्कां निवर्त्त्यानुमानम्। तथा सति शाब्दमेवार्थे प्रमाणमस्तु· प्रतिबन्धिकायाः शङ्काया निरस्तत्वात्
अवगत्यै हि बुद्धिविशेषमनुमितस्ततः प्रथमं पदार्था आलोचनीयास्तेषां चान्वययोग्यता ज्ञातव्या। ते चालोच्यमाना द्रागेव वाक्या
र्थमवबोधयन्तीति नानुमानं प्रतीक्षन्ते· किं चानुमिते बुद्धिविशेषे पश्चादनुवादभूतं वाक्यं वाक्यार्थमवबोधयन्तीति सद्भ्रान्तः
ततश्चयो नामा नापूर्वा प्रवृत्तिर्गृहीतस्तस्माद्वाक्याद्यथार्थमेव ज्ञानमुत्पन्नमित्युपगन्तव्यम्· ततश्च दोषाधीनत्वादप्रा
माण्यस्य वक्तृदोषाणां च शब्देन संक्रान्त्यनभ्युपगमात्· स्वारसिकमेव वेदस्य त्वमापन्नमिति बलादप्रामाण्यवे
दस्य प्रसज्यत इत्यास्तां तावत्। तस्माद्नाप्रवचसां सम्यग्वा प्रामाण्यं वक्तृदोषाधीनत्वादेव चेत्तदभावात्प्रामाण्यमित्येवव 27
क्तव्यम्। तस्माच्चोदनालक्षणक एव धर्मः श्रेयस्कर इत्यर्थः। यदेव श्रेयःसाधनभूतं यागहोमादि तदेव धर्म इत्युच्यते लोके
नापूर्वमन्तःकरणवृत्त्यादि वा· लोकप्रसिद्धिविरहात्· न नापूर्वमेव श्रेयःसाधनम्· न· अवान्तरव्यापारत्वात्·
मात्र

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ऋग्. दी निभवन्तीति वैषम्यम्। ।केचित्तु आहुर्लोकेऽपि शब्दस्यायथार्थत्वमस्ति तदभावात्। नहि लोके शाब्दप्रमाणमस्ति वक्त्रभिप्रायानुमापकत्वा
५२ त्पुरुषवचसाम्। तेनानुमानस्यैवायं व्यभिचारो न शब्दस्य न वा तस्यापि विवक्षाग्रहाच्छिङ्गं स्वलिङ्ग व्यवहारप्रवृत्तेः यदि तु शाब्द ६२
स्यैवायं व्यभिचारोऽभ्युपेयते स्वाभाविकमेवाप्रामाण्यं स्यात् नहि पुरुषदोषेण शब्दस्य दोषो भवति यथावस्थितशब्दाभिव्य
क्तिमात्रे पुरुषस्य व्यापारात् तदिदमसारम् यदि लोके शाब्दं नास्ति तर्हि वैदिकमपि कथं न स्यात् न ह्यभिप्रायानुमानक्षीणस्य शब्
दस्यार्थप्रतिपादकत्वे प्रमाणमस्तीत्युक्तं न्यायरत्नमालायाम् यदि च व्यभिचाराभ्युपगमे स्वाभाविकमप्रामाण्यं भवति
पुरुषदोषस्य शब्देनवतारादिति स्यादेतदेवम् यदीदं वाक्यं स पुरुषोऽभिव्यञ्ज्यात् तत्तु तेनैवाक्रियते वर्णानि त्यापदानि च
वाक्यानि तु पुरुषैरेव क्रियन्ते पौरुषेयत्वादेव यथावस्थितानि व्यज्यमानानि वेदवाक्यवदपौरुषेयाण्येव स्युः। ततश्च
वक्त्रभिप्रायानुमापकत्वमपि न स्यात् न यथा अध्येतृभिरभिव्यज्यमानानि वेदवाक्यानि नाध्येतॄणामभिप्रायं सूचयन्ति
तर्हि तद्वक्त्रभिप्रायानुमानेऽपि तुल्यम् अन्यथा संविदानस्याप्यन्यथा वाक्यरचनादर्शनात् किं च शब्दस्य चक्षुरादेरिवस्वसाम
तथा पुरुषवाक्यान्यपि न सूचयेयुः यदि हि व्यभिचारशंकया लोके शब्दस्यार्थप्रामाण्यं न संभवतीत्युच्यते १२

दप्रामाण्यमेव वेदानामिति प्राप्तेऽभिधीयते। ।परापेक्षं प्रमाणत्वं नात्मानं लभते क्वचित् मूलोच्छेदकरं पक्षं को हि नामाध्यवस्य
ति ।। यदि हि सर्वमेव ज्ञानं स्वविषयतथात्वावधारणे स्वयमसमर्थं विज्ञानान्तरमपेक्षते ततः कारणगुणसंवादार्थक्रिया
ज्ञानान्यपि स्वविषयभूतगुणावधारणे परमपेक्षेरन् परमपि तथेति न कश्चिदर्थो जन्मसहस्रेणाप्यध्यवसीयेत इति प्रामा
ण्यमेवोत्सीदेत् ।अथार्थक्रियाज्ञानं स्वतः प्रमाणमिति चेत् को विशेषः; अव्यभिचार इति चेन्न· स्वप्नावस्थायामसत्य
स्युदकाहरणेऽर्थक्रियाविज्ञानदर्शनात्· अथ सुखज्ञानमेवार्थक्रिया तच्चाव्यभिचार्येव· न हि कश्चिदप्यसति सुखे सुखज्ञा
नमस्ति· सत्यमेतत्· न तु तेन पूर्वज्ञानस्य प्रामाण्याध्यवसानं संभवति· अप्रमाणेनापि प्रियासङ्गविज्ञानेन स्वप्नावस्था
यां सुखदर्शनात् तस्मात् स्वतः प्रामाण्यं प्राप्तमर्थान्यथात्वकारणदोषज्ञानाभ्यामपोद्यत इत्यवश्यमङ्गीकरणीयम् ।
एवञ्चनाद्येनापुरुषसंस्पर्शीकृतत्वाद्दोषाणामपौरुषेये वेदे तदभावात् साक्षाद्वार्थान्यथात्वज्ञानाभावादनपोदितं प्रा 28
माण्यं भवति· पौरुषेयवचनानि तु पुरुषबुद्धिप्रभवत्वाद् भ्रान्त्या विप्रलिप्सया वा प्रयुक्तानि मूलदोषाद् दुष्टत्वादयथार्था

स्वरूपेण प्रामाण्याप्रामाण्यमनेनैव ...

ज्ञानप्रकाशितप्रकारभाववत्त्वमर्थतथात्वम्

प्र.५८ भावेनानिरूपितं कारणगुणदोषप्रत्ययाभ्यामवगम्यते आहोस्विदप्रामाण्यं स्वत एवगम्यते प्रामाण्यमनु कारणगुणज्ञानात्संवादज्ञानाद
११ र्थक्रियाज्ञानाद्वावधार्यते अत्र प्रामाण्यं स्वतः प्राप्तं सदर्थान्यथात्वकारणदोषज्ञानाभ्यामवगतेनाप्रामाण्येनापोद्यत इति तत्र सर्वका
रणानां स्वकार्यशक्तेः स्वाभाविकत्वादुभयमपि ज्ञानस्य स्वरसादेवावगम्यत इति केचित्तदयुक्तम् नहि ज्ञानं स्वविषयतथात्वमतथात्वं स्य
च युगपच्छक्नोति वेदयितुं विरोधात् अथ कापि ज्ञानव्यक्तिः स्वप्रामाण्यं स्वतो बोधयति काप्यप्रामाण्यमित्युच्यते तथापि न युक्तम्
कारणान्तरनिरपेक्षस्य ज्ञानस्यैवोत्पन्नोत्पन्नं महेतुत्वे किं कज्ञाने भवतीति शक्यं न विवेक्तुम् अतो द्वयमपि स्वभावेनानिरूपितं का
रणगुणदोषज्ञानाभ्यामवगम्यत इत्यपरे । तदप्यपेसलम् । एवं गुणदोषावधारणस्यागन्तरेणार्थमनवगमयतो हि ज्ञानं निः
स्वभावं स्यात् तस्मादप्रामाण्यमु स्वतः प्रामाण्यमनु संवादज्ञानादिभिरित्येतदेवयुक्तम् तथाहि न ज्ञानमुत्पन्नं इत्येताव
तार्थतथात्वावधारणयुक्तं व्यभिचारादनिश्चयाच्चाप्रामाण्यमेव तस्यां वेलायां प्राप्तं पश्चात्कारणगुणज्ञानात्संवादज्ञानाद
र्थक्रियाज्ञानाद्वा प्रामाण्यावगमादपोद्यते शब्दे चाप्तप्रणीतत्वं गुणेन च वेदे तदस्ति अपौरुषेयत्वाभ्युपगमात् अस्मत्प
क्षे चाप्तप्रणीतत्वाभावात् न तस्य तयोः सत्यमासत श्रणोत ग्रावाण इत्येवमादीनामुन्मत्तप्रलपितकल्पत्वादप्रत्ययितप्रणीतत्वा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षं प्रामाण्यं संभवति । उच्यते प्रत्यक्षं तावत्संयुक्तविषयत्वेन विद्यमानोपलम्भनत्वाद् भविष्यति धर्मे न समर्थम् । यद्यपि च गोदोहनादिद्रव्यं
यागादिकाश्च क्रियानीचेष्टादिगुणाश्च फलसाधनत्वाद् धर्मशब्देनोच्यन्ते । नापूर्वाद्युत्पत्तिर्ज्ञेयस्तत्करम्भाष्ये वक्ष्यते । तथापि तेषां फलसाधनरू
पेण धर्मत्वात् फलस्य च जन्मान्तरादिभावित्वात् । धर्मस्वरूपेण प्रत्यक्षविषयत्वं न संभवति । तत्पूर्वकत्वाच्चानुमानादिकमपि न प्रमा
णम् । भावनाफलं तु योगिप्रत्यक्षं धर्मे भविष्यतीति तदपि समर्थमिति मनोरथमात्रम् । भावना त्वनुभूतगोचरा नियतानुभूतेष्वेव निश्चयरूपां जम्प ५
स्मृतिं जनयेत् । न च सा प्रमाणम् । स्मृतित्वादेव । नतरां प्रत्यक्षमनिन्द्रियत्वात् । नेन्द्रियजन्यत्वं प्रत्यक्षमपि तु कल्पनापोढत्वमिति चे
त्सुतरां धर्मस्याप्रत्यक्षत्वम् । फलसाधनरूपस्याविकल्पग्रहणासंभवात् । तस्मादनिमित्तं प्रत्यक्षम् । तत्पूर्वकत्वाच्चानुमानाद्यपि ।
कारण दः कार्यपीयाः पुनः श्रुतिभाशानमचीरणां धर्मे प्रामाण्यमाहुः । तन्नु लिङ्गाद्याभासजन्यत्वादप्रमाणमेव न भवति किं पुनर्धर्मे । शब्दस्य तु बुद्धि नयामीस्तिता ।
जनकत्वादसत्यपवादे युक्तं प्रामाण्यम् । ननु न बुद्धिजननमात्रात्प्रामाण्यमुक्तम् । अयथार्थेष्वपि वाक्येषु बुद्धिजननाविशेषात् । निलमीयादिषु
सत्यम् । तत्र तु कारणदोषबाधकप्रत्ययाभावाद्युक्तमप्रामाण्यं वेदे तु तदभावात्स्वतः प्रामाण्यमपोदितं भवति । कथं पुनः प्रामाण्यस्य
स्वतः प्राप्तिः तदर्थमिदं सर्वज्ञानान्यधिकृत्य चिन्तनीयम् । किं प्रामाण्यमप्रामाण्यं चोभयं स्वतः एवावगम्यते अथवान्यतरद्यपि स्व

याज्ञिरचनापाः भारतमिश्राः तस्य प्रत्यक्षस्य यत्र प्रमाणादि दोषाः बाधकप्रत्ययाश्च युक्तं लौकिकवाक्यानामप्रामाण्यमिति ।

लक्षण ६

29

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शा॰ दी॰ ग्निहोत्रं चोदनाभ्योऽसंदिग्धज्ञानोत्पत्तेः स्वतः प्रामाण्यं प्राप्तम्· न चापवादकमर्थान्यत्वज्ञानं साक्षादस्ति· नापि कारणदोषज्ञानम्· पुरुषाश्र
१८ यत्वाद्धि दोषाणाम्· पदपदार्थसम्बन्धस्याकृत्रिमत्वान्न तद्द्वारेण पुरुषानुप्रवेशाभावाच्चोदनानामिति स्थिते शब्दस्यैवानित्यत्वात्कुतः
सम्बन्धनित्यतेत्याक्षिप्य शब्दस्य नित्यतया शब्दाधिकरणे सम्बन्धनित्यत्वे समाहिते माभूत्पदपदार्थसम्बन्धद्वारेण पुरुषानुप्रवेशः। वाक्य
वाक्यार्थयोस्तु लोके सम्बन्धादर्शनान्निर्मूलोऽग्निहोत्रादिवाक्यार्थप्रत्ययइत्यतो व्यामोहः सामयिको वा· अतो न वाक्यार्थे वेदस्य प्रामाण्यं सांकेतिकः
क्रियाशक्यपदार्थानां सम्बन्धग्रहणं समयं चानपेक्ष्यमाणानामेव वाक्यार्थे प्रामाण्यं सम्भवतीति तद्भूताधिकरणेन प्रतिपादिते पु
नर्वेदानां वाक्यात्मकत्वात्काठकलौदिसमाख्यानाच्च पौरुषेयत्वात्तद्द्वारेण दोषसंस्पर्शनमाशंक्य स्मर्तव्यत्वे सति अस्मरणयोग्या
नुपलब्धिनिरस्तस्य कर्तुरनुमानासंभवात् समाख्यायाश्च प्रवचननिमित्तत्वादपौरुषेया वेदा इति तदेकदेशानां चोदनानां सिद्ध
प्रामाण्यमित्येवं समस्तः प्रथमः पादः। चोदनासूत्रप्रतिज्ञातार्थोपपादने न तस्यैव परिकरः· सोऽयं भाष्यकारेण सारेण पदार्थो
नुक्रान्तः। इति कारमतं तु पश्चादनुक्रमिष्यामः॥ प्रकृतं वानुसरामः। प्रतिज्ञातं तावच्चोदनैव प्रमाणम्· सा च प्रमाणमेवेति· ननु १८
प्रत्यक्षादेरनपेक्षं प्रामाण्यं सम्भवतीति तस्यैव धर्मे प्रामाण्यम्· शब्दस्य तु सर्वदैव प्रमाणान्तरप्रमितविषयत्वान्न तदनपे

प्रत्यक्षत्वप्रयोजकरूपाद्यभावात्

किमस्य न किञ्चित्प्रमाणमस्ति किं वा प्रत्यक्षादिकमेव प्रमाणम् उत चोदनैव अथवा विकल्पोऽथवा समुच्चय इति । तत्राद्यस्य प्रमाणा
प्राप्त न्तरैः प्रापकत्वेन स्वयमप्रमाणत्वात् प्रत्यक्षादीनां चासामर्थ्यादप्रमाणको धर्म इत्येकः पक्षः । प्रत्यक्षादिगम्य एवेत्येकः पक्षः । यो
गिनां प्रत्यक्षगम्योऽर्वाचीनानां तु चोदनागम्य इत्यपरः । जगद्वैचित्र्यार्थापत्त्या किमप्यदृष्टमस्तीति सामान्येन प्रसिद्धो धर्मश्चो सा च प्रमाण
दनयाग्निहोत्रादिविशेषरूपेण गम्यते तस्मात्समुच्चय इति पक्षान्तरम् । चोदनैव प्रमाणमेव नाप्रमाणकत्वमिति सिद्धान्तः । तदि ४
१ सा च प्रमाण हचोदनैव प्रमाणमेवेत्यवधारणद्वयं प्रतिज्ञायते । निमित्तसूत्रे तु प्रथम द्वितीयसूत्रे मात्रालोचनया वेदो धर्ममूलमित्याद्यव
दुपदेशशास्त्रताशङ्का माभूदिति परीक्षाशास्त्रमिदमिति ज्ञापयितुं परीक्षाज्ञानम् । यद्यपि चोपरितनव्यापारादेव परीक्षाशा
स्त्रत्वं गम्यते तथापि वक्ष्यमाणमेवौत्सुक्यसमाधानाय कीर्तितम् । प्रत्यक्षसूत्रेण तु प्रत्यक्षस्याविद्यमानोपलम्भनत्वाद्भवि
ष्यति धर्मे प्रामाण्यासम्भवात् तत्पूर्वकत्वेन चेतरेषामप्यप्रामाण्यात्प्रमाणान्तराणि नियमविकल्पसमुच्चयनिराकरणाच्चो
दनैवेत्ययमर्थः सिद्ध इति । औत्पत्तिकसूत्रेण तु स्वतःप्रामाण्यमर्थान्यथात्वकारणदोषज्ञानाभ्यामप्रामाण्यमित्याश्रित्या ३०

मेवेद ४ प्रति४

श्लो.वा. त्ति·विधिप्रत्यययोगात्सिद्धेश्चार्थव्युत्पत्तिविरहादप्रामाण्यमेव श्येनादिवाक्यानां स्यात्· अथ पूर्वसूत्राद्वेदार्थपरं धर्मपदम
८ नुषज्य चोदनालक्षणो वेदार्थ इत्येकं वाक्यम् अर्थो धर्म इत्यपरं वाक्यम्· तदिदं स्वप्रज्ञाविलसितमोजस्· अनुषंगवाक्यभेद
योर्विना फलमाश्रयणादप्रतिज्ञातस्य च धर्मस्य लक्षणमसङ्गतम्· अथ प्रतिज्ञातस्यैव वेदार्थस्य कार्यत्वसिद्धये ध
र्मत्वमुच्यते· किं कार्यस्वरूपधर्मरूपो वेदार्थः स एव जिज्ञास्यो न सर्वः· तथा च य एव जिज्ञास्यो वेदार्थस्तस्यैव सूत्राक्षरा
विनाशेन जिज्ञासा प्रतिज्ञातव्येति वेदार्थप्रतिज्ञावचनमनर्थकम्· अथ त्वर्थशब्दमनादृत्य यो वेदार्थः स कार्यरूप इ
त्युच्यते तत्तोर्थपदमनर्थकम्· वस्तुमात्रपर्यायमनुवादकं स्यात्· अनर्थव्युदासार्थता चास्य भाष्यकारेणोक्ता· तस्मा
द्विशेषणसामर्थ्येनैतत्· विशेषणत्वे चाभ्युदयरूपस्य वेदार्थस्य कार्यत्वाभिधानादनभ्युदयरूपस्य कार्यत्वं न स्यादिति
सर्वस्य वेदस्य कार्ये एव प्रामाण्यमिति नियमो न स्यात्· ततश्चा[illegible] विनाशी अरेयमात्मेत्यादीनामात्मस्वरूपपरत्वं
न निराकर्तव्यमित्यास्तां तावत्· तस्माद्धर्मस्वरूपप्रमाणप्रतिपादनार्थमेवेदं सूत्रम्· तदिह धर्मो विषयीकृत्य चिन्त्यते ९

तिपादनेशब्दस्य सामर्थ्यं व्युत्पद्यते· तस्मान्नैकान्ततः कार्यार्थता शब्दानां का वा स्त्रस्य वचनव्यक्तिः· यदि तावद्यत्कार्यं तद्वे स्या २
दार्थ एवेति कार्यमुद्दिश्य वेदार्थता विधीयते· तथा सत्युद्दिश्य· पादेयेनु सम्यं स्वरस नियमात्सर्वस्य लौकिकस्यापि गवा
नयनादिकार्यस्य वेदार्थता स्यात्· किं चोपादेयस्य वेदार्थस्योद्देश्येन कार्यरूपेणाग्नेरिव धूमेनाव्याप्तेरकार्येपि वेद
स्य प्रामाण्यमनिरस्तं स्यात्· अथ यो वेदार्थः स कार्यरूप एवेति ततो यो धर्मः स चोदनालक्षण इति वचनव्यक्तिः स्या
त्· तत्रार्थशब्दोऽभ्युदयवाची कस्य विशेषणम्· यद्युपादेयस्य चोदनार्थस्य तदा सर्वस्य वेदार्थस्य कार्यत्वमर्थत्वं च वि
धीयते इति श्येनादिनियोगानामप्यर्थत्वं स्यात्· अथोद्देश्यस्य वेदार्थस्य विशेषणं ततोयमर्थो भवति योर्थोऽभ्य
कोऽभ्युदयात्मको वेदार्थः स कार्यरूपस्तथा च श्येनादिनियोगानां निषिद्धफलत्वेनानभ्युदयस्वरूपाणां कार्यता
न स्यात्· माभूदिति चेन्न· तेषामपि लिङा कार्यतावगमात्· श्येनयागस्य कार्यता निवारयितुं शक्यते नेति योगस्य·
तस्य कार्यैकस्वभावात्· असति च कार्यत्वे श्येनवाक्यस्य कार्यार्थत्वाभावात्सिद्धार्थतैव वक्तव्या स्यात्· न च तथा संभव 31

२त. ५९ श्चिदन्विताभिधायीस्यात् तत्रान्वितप्रतीतिः कथंसिद्ध्येत् वक्तृज्ञानानुमानादितिचेन्न · यद्विषयंहिवाक्यंतद्विषयमेववक्तृ
८ ज्ञानमनुमातव्यम् · नचान्वितप्रतिपादकंवाक्यमुच्चरितमितिकथमन्वितज्ञानानुमानम् · अथार्थस्वरूपस्मारकैःपदैरन्वि
तज्ञानमनुमीयतेततःकार्यवाचिष्वपिसिद्धेरन्विताभिधानंनस्यात् · किंचप्रथममेवकार्यव्यभिचारःशक्योवगन्तुम् · यदाहि
पुत्रस्तेजातइत्युक्तस्यकस्यचिन्मुखविकासंपार्श्वस्थःपश्यतितदाहर्षहेतुरनेनशब्देनप्रतिपादितइतिहर्षहेतुभूतसिद्धा
र्थप्रतिपादनेशब्दस्यसामर्थ्यंकल्पयति · यद्यपिचतदानींअर्थविशेषानज्ञायतेहर्षहेतूनांबहूनांसम्भवात् · तथापि
सिद्धार्थतातावदवगतानावतापिकार्यव्यभिचारासिद्धिः ॥ किंचबहुशःपुत्रजननेसत्येवंविधशब्दप्रयोगादन्येषुहर्षहे
तुष्वप्रयोगात्पुत्रजननार्थविशेषोपिसुज्ञानएव · किंचप्रवृत्त्यधीनापिव्युत्पत्तिर्नावश्यंकार्यविषयैवभवति · त
थाहि · यदाकश्चित्प्रवृत्तावत्यन्तासमर्थंवृद्धमातुरंवाप्रतिविनोदार्थंवाक्यंप्रयुङ्क्तेनद्यास्तीरेफलानिसन्तीतितत्रान्यो
दैवसङ्गतःकश्चिदेतद्वाक्यमर्थाच्छ्रुत्वानदीतीरंगत्वाफलान्याहरतिएतत्सर्वंपश्यन्नन्योपिव्युत्पित्सुःफलसद्भावप्र ८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्सधीनैव व्युत्पत्तिः। स्थाल्यां काष्ठैरोदनं पचतीत्यादिवर्तमानापदेशेष्वपि प्रसिद्धतृतीयार्थानां प्रसिद्धकारकप्रातिपदिकार्थानां च
पुरुषाणां कार्यार्थे व्युत्पत्तिदर्शनात्· प्रथमव्युत्पत्तिः कार्यविषयैव नहि तदा शब्दान्तरवशेन शब्दान्तरव्युत्पत्तिः सम्भवति स
र्वस्याप्रसिद्धत्वात् इति चेत् अस्त्वेवं तथापि वृद्धाः पश्चात्सिद्धार्थप्रयोगदर्शनात् कोयं राजा पांचाल इत्यादिषु प्रश्नप्रतिव
चनादिषु कार्यस्य व्यभिचारादव्यभिचारिसर्थमात्रं वाच्यमिति सुज्ञानं· यथैव हि कस्यांचिद्व्यक्तौ प्रथमं गोशब्दस्य प्रयोगदर्श
नात्सैव वाच्येत्यवगमे सत्यपि व्यक्त्यन्तरे प्रयोगदर्शनात् पूर्वव्यक्तिव्यभिचारादव्यभिचारि सामान्यमेवार्थ इत्यध्यवसीयते·
तथा कार्यपरतामवगतामपि पश्चात्सिद्धार्थप्रयोगदर्शनेन बाधितार्थमात्रमेवाव्यभिचाराद्वाच्यमिति युक्तम्· किं च· प्र
थमव्युत्पत्तौ कतिपयानामेव शब्दानां कार्यार्थत्वमवगतं न सर्वशब्दानां कार्यार्थत्वमवगतम्· अतः पश्चाद्व्युत्पद्यमा 32
नस्य कार्यादेः सिद्धार्थव्युत्पत्तिः केन वार्यते· न च व्युत्पत्तौ शब्दानां पौर्वापर्यनियमोस्ति अतः सर्वे शब्दाः पश्चाद्व्युत्पद्य
मानाः केचित्सिद्धार्था भवन्ति· सर्वेषां च कार्यार्थत्वे सिद्धार्थपरेषु लौकिकवाक्येषु सर्वशब्दानां लाक्षणिकत्वान्न क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दानीमात्मादिवाक्यानामप्रामाण्यप्रतिपादनपरमिदं सर्वं सुव्याहृतं तर्हि शास्त्रारंभे प्रथमं तावत्सूत्रकारोऽप्रा
माण्यमेव वेदवाक्यानां प्रतिपादयतीति· कथं च कार्यएव प्रामाण्यम्· तत्रैव व्युत्पत्तेः। प्रवृत्त्यधीना हि व्युत्पत्तिः
सा च कार्यावगमाधीनेति व्युत्पत्तिरपि तत्रैव भवतीति चेत्· नावश्यं प्रवृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रमाणविधावर्थश्चोदनागम्यएवाग्निहोत्रादिधर्मोनातल्लक्षणश्चैत्यवन्दनादिरितिस्वरूपमपिसिद्धमिति· तथायश्
चोदनालक्षणः सधर्मइतिस्वरूपविधौवर्थात्प्रमाणसिद्धिर्वेदितव्या· कश्चित्वाह· कार्यरूपोवेदार्थोनसिद्धरू
पइतिअनेनसूत्रेणोच्यते· चोदनालक्षणशब्देनकार्यमुच्यतेधर्मशब्देनवेदार्थइति· तदयुक्तम्· यानिताव
त्सिद्धिवाक्यानितेषांविधावेवप्रामाण्यंवस्तुस्वरूपेचाप्रामाण्यंविस्पष्टमेवेतिनतत्रकिञ्चिद्वक्तव्यम्· से
पिष्ठादिवाक्यानामपिविध्येकवाक्यतयातत्रैवप्रामाण्यम् अन्यत्राणामपिप्रकरणेनप्रधानशेषत्वंद्विती
येपादेवक्ष्यतेइतिनतत्रापिवक्तव्यमस्ति· येन्वकस्यात्रसिद्धार्थतांनिरस्यकार्यार्थतोच्यते· अविनाशीवा
अरेयमात्मेत्यादीनामुपनिषद्वाक्यानामितिचेत्· तेषामपियदिविध्येकवाक्यत्वमस्तिततोर्थवादाधि
करणेनगतं· अथनास्तिकथंतेषांकार्यार्थतास्यात्· अथतेषांविधिश्रवणाद्विध्यन्तरेणैकवाक्यता 33
भावाच्चकार्यार्थत्वानुपपत्तेर्मन्यसेनिर्विरहासिद्धार्थेप्रामाण्ययोगादप्रामाण्यमेवाभिमतमिति· किमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

६८ जिज्ञासा कर्त्तव्येति सिद्धमेवैतावदध्ययनविधिप्रयुक्ते· नैमैवन्यायेनाध्ययनस्यार्थज्ञानार्थत्वसिद्धेरध्ययनानन्तर
प्रयोजनविवक्षया सूत्रकारेणोच्यते· यदाहुः धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनमिति· ननु कस्य चिद्वेदवाक्यस्यार्थो
विचार्यते· तदाहुः· न चात्र चोदनाव्याख्येभोरवंतत्र चोदितमिति· तत्सिद्धमध्ययनानन्तरं धर्मजिज्ञासा कर्त्तव्येति· सा चतुर्वि
धा· धर्मस्वरूपप्रमाणसाधनफले· नन्वध्ययनविधिना वेदवाक्यार्थविचारमात्राक्षेपाद्धर्मस्वरूपप्रमाणजिज्ञासयोः कः प्र
सङ्गः· उच्यते· उपोद्घातत्वात्प्रसङ्गः· यदि हि वेदवाक्यार्थे धर्मः स्याद्वेदश्च प्रमाणं तदा सो विचारः कर्त्तव्यो भवति· इ
तरथा काकदन्तपरीक्षावत्स्यात्· तदध्ययनविधिरेव प्रमाणादि विचारमाक्षिपति· धर्मग्रहणं चोपलक्षणार्थम्·
अधर्मस्यापि हानाय जिज्ञास्यत्वात्· अकारप्रश्लेषेण वा सूत्रमधर्मजिज्ञासायामपि व्याख्येयमिति निरव
द्यम्· चोदनालक्षणोऽर्थो धर्मः· प्रथमं तावत्को धर्मः· कथं लक्षणक इत्येतद्द्वयमनेन सूत्रेणाश्रुत्यर्थाभ्यां नि
रूप्यते· यो धर्मः स चोदनालक्षणः· चोदनैव तस्य लक्षणं प्रमाणम्· चोदना च तस्य लक्षणमेवेति श्रुत्या

६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्याविहितेन लौकिकेनाध्ययनेन तत्संभवान्नाविहितस्याध्ययनस्य नियोगतस्तत्प्रयुक्तिः ॥ न च प्रयुक्तिलाघवादपि विहितोपजीवनं तदुपजी
वनेपि प्रयुक्त्यनवलोपात् ॥ विहितमप्यध्ययनमध्येयनविधिनैव प्रयुज्यते नाध्यापनविधिना तस्माल्लौकिकमेवाध्ययनमुपनीता
नामध्यापनविधिराक्षिपेत् ॥ विधिविहितमध्ययनं परप्रयुक्त्यभावादधिकारं प्रकल्पयेत् ॥ किंच यद्युपनयनमध्यापनाङ्गं तेनोध्य
यनविधिरर्थज्ञानार्थः सन्नाध्यापनार्थतयोपनीतैः शिष्यैर्वर्णिकैः सम्बध्येत ॥ येध्यापनार्थतयोपनीतास्ते वर्णिकास्तदुपयोगिव्यापा
रमपेक्षन्तेर्थज्ञाना[illegible]मथोपनीताश्रितेनिअसान्वेच्छार्थमेव स्यात् ॥ ततश्चोपनीतेरसम्बद्धमानोध्ययनविधिश्चतुर्णामपि वर्णा
नां स्यादित्यश्रुताधिकारप्रसङ्गः ॥ तस्मादुपनीतानां प्रयोजनापेक्षिणामध्ययनकरणिकार्थज्ञानभावना विधीयत इत्यध्य
यनाङ्गमेवोपनयनम् ॥ स्वविधिप्रयुक्तं चाध्ययनम् ॥ प्रपञ्चेनायं पक्षो न्यायरत्नमालायामेवाभिरत इत्युपरम्यते ॥ तस्मात्पूर्वो
क्त एव विचारः किमदृष्टार्थमध्ययनं श्रुताक्षरग्रहणादिपरंपरयार्थज्ञानार्थमिति ॥ अथवा नात्र किञ्चिद्विचार्यते न्या 34
यमिकन्यायेनैवाध्ययनस्याक्षरसंस्कारादिपरंपरयार्थज्ञानार्थत्वसिद्धेः ॥ न च मोहितानामप्यक्षराभिव्यक्तिद्वारेणानुप
योगित्वदर्शनात् तादर्थ्यमेव नादृष्टार्थत्वमिति वक्ष्यते ॥ तेनैव न्यायेनाध्ययनस्यार्थज्ञानार्थत्वासिद्धेरध्ययनानन्तरं धर्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शा·दी· त्वस्याहवनीयत्वादेरग्निसमवेतत्वेन कर्तृसमवायाभावात् · इयं चास्य निरूपनीयं नयः शिष्यति · अतो बलीयसी द्वितीया श्रुतिः · तस्मान्नाध्ययनाङ्ग
५ मिति न तद्द्वारेणाध्ययनस्य प्रयुक्तिः · यज्ञोपनीतस्य व्यापारापेक्षायामुपनयनं प्रकृत्य विहितमध्ययनं तद्व्यापारत्वेनाध्यवसीयते इति · न
दप्यवृद्धिपूर्वकम् · एवं हि वदताध्यापनाङ्गमध्ययनमित्युपपादितं भवति · यदा ह्यध्यापनार्थत्वेनोपनीतस्य माणवकस्य तदुपयोगि
व्यापारापेक्षायामध्ययनविधिरेवाध्ययनं तदुपयोगिव्यापारतया विधत्ते · गेवर्णिके ह्युपनीते स्याध्यापनोपयिकव्यापारापेक्षेऽध्य
यनव्यापारः कर्तव्य इति तदा स्पष्टमेवाध्यापनशेषोऽध्ययनमिति दूरनिरस्तमर्थज्ञानार्थत्वमिति सुनिरूपितो वाक्यार्थः · अथाध्य
यनविधिरध्ययनमर्थज्ञानार्थतया विधत्ते नाध्यापनोपयिकतया · न तोऽस्याध्ययनस्य तदौपयिकत्वेन प्रमाणेनावगम्यते · नह्य
त्र प्रत्यक्षादीनि प्रक्रमन्ते · सन्निधानादिति चेत् न · सन्निधानं नाम स्वयं प्रमाणम् · शब्दस्य त्वर्थं प्रतिपादयतः सन्निधापेक्षायो
ग्यत्वानीति कर्तव्यतानेनुस्येषान्मीलनम् · शास्त्रं चेदध्यापनौपयिकतयाध्ययनं विदध्यान्नार्थज्ञानार्थता सिद्ध्येत् · अर्थज्ञाना
र्थतया विधाने ध्यापनौपयिकता न सिद्ध्येत् · अतोऽनोपनयनसान्निधौ स्वाध्यायोऽध्येतव्य इति विहितस्याध्ययनस्योपनयन
द्वाराध्यापनविधिना प्रयुक्तिसम्भवः · यदि परमध्यापनस्याध्ययनमन्तरेणासंभवात्पदार्थस्वभावेनाध्ययनमाक्षिपेत् · तथा ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साक्षादङ्गत्वमेवोच्यते अतो यथा त्रिवृता यूपपरिव्याणं यूपार्थं नोपाकरणार्थं · एवमुपनयनमपि माणवकसंस्कारार्थं · स्मृतिगतश्चात्का
प्रत्ययः प्रत्यक्षश्रुतिगतात्वसन्नेधाश्रणाभिति द्वितीया · अतोपि माणवकार्थत्वं । भवतु माणवकसंस्कारत्वं द्वारेणाध्यापनाङ्गं नाध्ययना
ङ्गमिति चेत् · नैवम् · अन्तरङ्गत्वादध्ययनस्य तादर्थ्यमेव संस्कारस्य युक्तम् · अध्ययनमपि फलवत् · अध्यापनमपि तयोः कस्या
यं माणवकसंस्कारोङ्गं भवत्वित्यपेक्षायामध्यापनस्य पुरुषान्तरगामित्वेन वहिरङ्गत्वान्माणवकगताध्ययनार्थमेव युक्तम् · यथैव
ह्यध्ययनस्याचार्यत्वसिद्धिप्रयोजनतामनादृत्य वेदमधीत्य स्नायादिति स्मृतिं वाधित्वान्तरङ्गत्वादर्थज्ञानार्थत्वमाश्रीयते · तथो
पनयनस्याप्यध्ययनार्थता वेदितव्या · स्मरणादपि पाणिनीयादध्ययनाङ्गत्वेनोपनयनस्यावगम्यते · अध्ययनाङ्गतां हि स्मरन्ना
चार्यकरणे नयतेरात्मनेपदं विधत्ते · अध्यापनाङ्गत्वे हि कर्त्रभिप्रायत्वात् क्रियाफलस्य ञित्वादेवात्मनेपदं सिद्ध्येत् · उपनीयते
यः शिष्यमिति क्ताप्रत्ययो हि कथंचिद्दर्शपूर्णमासाभ्यामिष्ट्वेतिवदसत्यप्यङ्गाङ्गिभावे वकल्प्यते · पुनर्विधाने चात्मनेपदस्यो 35
त्पन्नानर्थकम् · तस्मादध्ययनाङ्गमुपनयनं स्यात् · न स्यात् · तज्जन्यः संस्कारो हि माणवकसमवायी · सत्यं · माणवकसम
वेतोपि न तदर्थः · कर्त्रर्थत्वं च फलस्य कर्त्रभिप्रायत्वं · न तु तत्समवायः · अन्यथा ह्यग्नीनादधीतेत्यात्मनेपदं न स्यात् · आधानफ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यद्यपि कथंचित्परप्रयुक्तानुष्ठानादात्मलाभः स्यात्तथापि न तावता कार्यत्वं सिद्ध्यति · नहि कृतिसाध्यतामात्रं कार्यत्वं · किं तर्हि यत्कृ
तिसाध्यं कृतिं प्रति प्रधानभूतं तत्कार्यमित्युच्यते । प्राधान्यं च कृतेस्तदुद्देशेन प्रवृत्तिः । न तस्याध्ययननियोगेन कार्येण भ
वितव्यं स्वरूपस्य व्यापारोद्देश्येन भवितव्यम् · न चासति नियोज्ये तदुद्देशेन कश्चित्प्रवर्तते · अध्यापनविधिना हि प्रवर्त्यमानो
माणवकः कथंचिदध्ययनमात्रमनुतिष्ठेन्न त्वपूर्वमुद्दिश्येत · न हि तस्य तदुद्देश्यं प्रमाणाभावात् · प्रयाजाद्यपूर्वाणि दर्शपूर्णमा
सापूर्वोपकारत्वात्तदधिकृतेन पुरुषेणानुष्ठीयमानानि उद्दिश्य क्रियमाणानीति युक्तं · यदस्त्यपि साक्षान्नियोज्योपादाने का
र्यत्वं लभन्ते · अध्ययननियोगस्य नान्योपाधिकत्वं यतस्तदुपयोगोद्देश्यता स्यात् · अर्थज्ञानस्य च विषयफलत्वेन नियो
गानपेक्षत्वात् · तस्मादस्य कार्यत्वसिद्धये ऽवश्यं नियोज्यः कल्पनीयः · यच्चाध्ययनविधेरुपनयनद्वाराध्ययनप्रयोज
कत्वमुक्तम् · तदप्ययुक्तम् · उपनयनप्रयुक्तेरेवाभावात्तद्द्वारेणाध्ययनप्रयुक्ति दूरापास्ता · क्त्वाप्रत्ययेन हि समा
नकर्तृकत्वमेवोच्यते · तेन चैकप्रयोगता कल्प्यते · अङ्गाङ्गिभावस्त्वेकप्रयोगतावशात्कल्पनीयः · द्वितीये पात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृत्वादर्थज्ञानार्थत्वं न शास्त्रगोचरतामनुभवतीति· तत्र यदेवास्मदभिप्रेतं विधेर्नियमार्थत्वं महता प्रयत्नेन भवद्भिर्दूषितं·
तदेव भवद्भिरपि मुक्तलज्जैरनन्यगतिकत्वादाश्रयणीयमापन्नं नियमाङ्गीकारे च पूर्वपक्ष एव श्रेयानापद्येत· आचा
र्यकस्यादृष्टत्वेन प्रयोजनतोपपत्तेः· अर्थज्ञानार्थत्वे चाध्ययनं स्वाध्यायसंस्कारो नियोगार्थत्वे तु प्रधानकर्मेति वैरूप्यम
पि स्यात्· अर्थोऽज्ञातमर्थज्ञानं प्रयोजनं न तु शास्त्रत इति चेत्· आचार्यकमपि प्रयोजनं न स्यात्· तस्याप्यर्थोऽज्ञातत्वात्· स्व
तिबाधेन त्वस्नानोत्कर्षो न स्यात्· अशास्त्रस्वीकृतत्वाद्द्विवारस्य· किंच· नियोज्यः कल्पनीयोऽनुविध्यर्थानुपपत्तेः· न
चोपनयनस्याङ्गभावोऽस्याध्यापनं प्रति। द्वितीयाश्रुतिसामर्थ्यात्सा माणवकसंस्कृतया। तथा सत्यनङ्गत्वादङ्गमध्यय
नस्य तत्· यत्तावन्नियोज्याभावादप्रयोजकत्वमध्ययनविधेरिति· तदयुक्तम्· अभावासिद्धेः· अत्र तस्यापि विश्वजिदादिव 36
त्कल्पनात्· कार्यं हि विध्यर्थः· संबन्धिशब्दश्चायं कार्यमिति कस्यचिद्धि किंचित्कार्यं भवति· न तु सर्वं सर्वस्य· अतः कस्येदं कार्यमि
त्यस्ति प्रतिसंबन्ध्यपेक्षा· सावश्यमध्याहृतेन केनचिन्निवर्तनीया· अस्येदं कार्यमिति· यस्येदं कार्यं स एव नियोज्य इत्युच्यते·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यप्रयुक्तिः उच्यते·उपनीयतु यः शिष्यं वेदमध्यापयेद्द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते इति स्मृत्यनु
मितः उपनीयाध्यापनेनाचार्यकं कुर्यादित्याचार्यकरणविधिः अत्र चाध्यापनमाचार्यकसाधनम्·उपनयनं तु
त्क्वा प्रत्ययानस्यैवाङ्गम्·तच्च केन द्वारेणाध्यापनस्योपकरोतीत्यपेक्षायामुपनेयासन्निरेवास्य द्वारमङ्गीक्रि
यते लिङ्गात्·उपनीतोपि नाकिञ्चित्करोऽमितितन्त्र्यापारापेक्षायामुपनयनं प्रक्रम्य विहितमध्ययनमध्याप
नोपकारित्वादुपनीतस्यव्यापारत्वेनाध्यवसीयते·तदेवं स्वाङ्गभूतमुपनयनप्रयुञ्जानोध्यापनविधिस्तद्द्वारे
णाध्ययनं प्रयुङ्क्ते·तदेतदनुपपन्नम्·तथाहि नियोगार्थस्याध्ययनस्याचार्यकप्रयोजनता अर्थज्ञानप्रयो
जनता च न शक्यते न शास्त्रेण बोधयितुं·साध्यद्वयस्यैकत्रासंभवात्·नियोगार्थतैव शास्त्रेण बोध्यते र्थज्ञानार्थ
ताया न्त्वनुज्ञामात्रमिति चेन्न·तथाप्यर्थद्वयं स्यादेव·किं चैवं स क्रतु [illegible]रितस्य विधिप्रत्ययस्य विध्यर्थत्वमर्थ
ज्ञानार्थत्वं चेति वैरूप्यमपि स्यात्·तेन स शाय एवानुपपन्नः। तथा सिद्धो न्तेप्यनुपपन्न एव·प्रमाणान्तरासि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

फलवदध्ययनकर्तृभूतमाणवकसंस्कारत्वादुपनयनमध्ययनाङ्गम्· अध्ययनमपि दृष्टार्थज्ञानार्थम्· अर्थज्ञानञ्च
नुष्ठानोपयिकत्वात्प्रसिद्धफलेन कर्मणैवेति सर्वेषाम्फलवत्वम्· एवंच त्रैवर्णिकेषु विद्वत्सु लब्धेषु नाग्निहोत्रादिविध
यस्त्वर्थविधावन्तमाक्षिपति· किन्तु त्रैवर्णिकानेव विदुषोधिकुर्वन्ति· सोयमधिकारनियमो षष्ठाधिकरणे
वक्ष्यमाणोध्ययनविधिप्रसादलभ्य इति फलवानेव विधिः· तेनार्थज्ञानावसानमध्ययनमध्ययनविधिना वि
धीयते इति विचारमन्तरेण तदनुपपत्तेरध्ययनविधिरेव विचारमाक्षिपंस्तद्धेतुः स्नात्ते स्नानं बाधते इति सि
द्धमध्ययनानन्तरं धर्मजिज्ञासा कर्त्तव्येति। केचित्पुनराचार्यकरणविधिप्रयुक्तत्वमध्ययनस्याङ्गीकृत्याकि
माचार्यकसिद्धिरेवाध्ययनस्य प्रयोजनमुतार्थज्ञानमिति विचार्यान्तरङ्गत्वादर्थज्ञानमित्याहुः· किं पुनः 37
कारणमाचार्यकरणविधिप्रयुक्तत्वेध्ययनस्य· अध्ययनविधेरधिकारशून्यत्वादाचार्यकरणविधिप्रयु
क्त्या चात्मनो विश्वजिदादिवत्फलकल्पनानुपपत्तिः· कः पुनराचार्यकरणविधिः· कथं वा तेनाध्ययन

शा· दी· ध्ययनस्य· अनारभ्याधीतत्वात् श्रुत्याद्यभावाच्चाक्रत्वर्थत्वं तस्माद् दृष्टार्थमेव स्वाध्यायाध्ययनमाचार्यदेवसमाप्तेः शास्त्रार्थगुरुगृहा
२ त्समावर्तितव्यमिति प्राप्ते विधीयते· लभ्यमाने फले दृष्टे नादृष्टपरिकल्पना। विधेश्च नियमार्थत्वान्नानर्थक्यं भविष्यति।। यदुक्तं
ज्ञानस्वरूपे क्रत्वपूर्वे वा न नियमः सम्भवतीति· तदभिधीयते· नोभयथापि ब्रूमः· कथं तर्हि योयमग्निहोत्रादिष्वधीतवेदा
नां त्रैवर्णिकानामेवाधिकारो नानधीतवेदानां शूद्राणामित्यधिकारनियमः सप्रयोजनमध्ययनविधेः। तथाहि असत्यध्यय
नविधावग्निहोत्रादिशास्त्राणि विद्वांसमनूद्यमानानि अविद्वांसमेवाधिकुर्युः विद्यामन्तरेणानुष्ठानासंभवाद्विद्वां
समाक्षिपन्त्यविशेषाच्चतुरो वर्णानधिकुर्युः सति त्वध्ययनविधौ त्रैवर्णिकानामेव विदुषामधिकारो भवति न तुरी
यस्य। तथाहि वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यमिति द्वितीयानिर्देशादुपनयनसंस्कृतास्त्रैवर्णिकाः
किमस्माभिः कर्त्तव्यमित्यपेक्षन्ते· तत्सन्निधौ चाध्ययनमनिर्दिष्टकर्त्तृकं विधीयमानं कर्त्तारमपेक्षन्ते· तत्रापेक्षा
सन्नियोग्यत्वैरेवं विज्ञायते· त्रैवर्णिकैरेवोपनीतैरध्ययने माक्षिप्ति [illegible] एवं च २

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यं सम्बन्धः प्रयोजनो ऽप्यैवार्थो ज्ञायत इति सूत्रकारेण न पृथगुक्त इत्यदोषः ॥ अत्रेदं चिन्त्यते । किं अध्ययनानन्तरं धर्मजि
ज्ञासया गुरुगृहे वस्थातव्यं । उत गुरुगृहात्समावर्त्तितव्यमिति । यदि स्वाध्यायाध्ययनविधिना धर्ममात्रार्थमध्ययनं
स्वर्गार्थं विधीयेत तस्मिन्मात्रेणोपकारस्य समाप्तत्वाद्धीत्य स्नायादिति स्मृतिवचनबलेन समावर्त्तितव्यं । अथा
क्षरग्रहणादिपरंपरोपजायमानवाक्यार्थज्ञानार्थमध्ययनं विधीयते । ततस्तस्य विचारमन्तरेणासम्भवादध्ययन
विधिनैवार्थाद्विचारोऽपि विहित इति गुरुगृह एवावस्थाय विचारयितव्यो धर्मः ॥ तत्र विनापि विधिना दृष्टफलाभावान्न
हि तदर्थता । कल्प्यस्तु विधिसामर्थ्यात्स्वर्गो विश्वजिदादिवत् । स्वाध्यायसंस्कारद्वारेणाध्ययनस्यार्थज्ञानहेतुत्वे वि
नैव विधिनावि~~हितमिति गुरुगृहस्य~~ प्रमाणान्तरेण सिद्धमेवेति तादर्थ्ये विधानर्थक्यम् । न चावघातादिविधिवन्नि
यमार्थत्वम् । अवघातो हि दर्शपौर्णमासापूर्वे नियम्यते । अवघातनिष्पन्नैरेव तण्डुलैरपूर्वं सिध्यतीति । न तण्डुलस्व 38
रूपे प्रमाणान्तरविरोधात् । तद्वदिहापि ज्ञानस्याध्ययनमन्तरेणापि दर्शनान्न त्स्वरूपे नियमासंभवात् क्रत्वपूर्वे वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शा.दी.

श्रीगणेशाय नमः॥ ॥लक्ष्मीकौस्तुभवक्षसं मुररिपुं शङ्खासिकौमोदकीहस्तं पद्मपलाशताम्रनयनं पीताम्बरं
शार्ङ्गिणम्। मेघश्याममुदारपीवरचतुर्बाहुं प्रधानात्परं श्रीवत्साङ्कमनाथनाथममृतं वन्दे मुकुन्दं मुदा॥१॥ न्याया
भासतमश्छन्नशास्त्रतत्त्वार्थदर्शिनीम्। कुमारिलमतेनाहं करिष्ये शास्त्रदीपिकाम्॥२॥ अथातो धर्मजिज्ञा
सा अनेन सूत्रेण प्रारिप्सितस्य शास्त्रस्य श्रोतृप्रवृत्तिसिद्धये धर्मज्ञानं प्रयोजनं कथ्यते· यदा हि धर्मजिज्ञासाक
र्तव्येत्युक्त्वा शास्त्रमारभ्यमाणं दृश्यते तदा नूनमिदं शास्त्रं धर्मज्ञानप्रयोजनकमित्यवगम्यते। विदितं तावत्
प्रयोजनं। सम्बन्धोपि शास्त्रस्य प्रस्तावहेतुर्वक्तव्यः· यथा शास्त्रान्तरेषु द्विष्ठप्रधानत्यादिसम्बन्धः शा
स्त्रस्य प्रस्तावको वर्ण्यते· तथेहापि शास्त्रारम्भप्रयोजकानां सम्बन्धानामन्यतमो वक्तव्यः· अनेन सम्बन्धेनेदं शा
स्त्रमायातमिति· अन्यथा ह्यसंबद्धप्रलापिता स्यात्· सत्यम्· इह तु य एवार्थः प्रयोजनेन सह शास्त्रस्य साध्यसाध
नसम्बन्धः स एव शास्त्रस्य प्रस्तावको नान्यः· भवति हि साधनत्वमेव साध्यार्थिनः साधने प्रवृत्तिहेतुः· स चा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४२५८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४२५८

शास्त्रदीपिका

श्री ५ को सरकार
राष्ट्रिय पुस्तकालय

...t University, Balmeeki Campus, Kathmandu

शा·दी· १

श्रीगणेशाय नमः ॥ ॥ लक्ष्मीकौस्तुभवक्षसं मुररिपुं शंखासिकौमोदकीहस्तं पद्मपलाशता-
म्रनयनं पीताम्बरं शार्ङ्गिणम् ॥ मेघश्यामम् उदारपीवरचतुर्बाहुं प्रधानात्परं श्रीवत्साङ्कमनाथनाथमस-
मं वन्दे मुकुन्दं मुदा ॥ १ ॥ श्रीवरस्वामिनं नत्वा महाचार्यं च जैमिनिम् ॥ कुमारिलमतेनाहं करिष्ये शास्त्रदी-
पिकां ॥ २ ॥ अथातो धर्मजिज्ञासा । अनेन सूत्रेण प्रारिप्सितशास्त्रस्य श्रोतृप्रवृत्तिसिद्धये धर्मज्ञानप्रयोजन-
ता कथ्यते । यदा हि धर्मजिज्ञासा कर्तव्येत्युक्ता शास्त्रमारभमाणां हृदयेनेतदा नूनमिदं शास्त्रं धर्मज्ञानप्रयोजन-
मित्यवगम्यते । विदितं तावत्प्रयोजनं सम्बन्धोऽपि शास्त्रप्रस्तावहेतुर्वक्तव्यः । यथा ह्याशास्त्रान्तरेषु शिष्यप्रश्ना-
नन्तर्यादिसम्बन्धः शास्त्रस्य प्रयोजनकोपवर्ण्यते तथेहापि शास्त्रारम्भप्रयोजकानां सम्बन्धानामन्यतमो वक्त-
व्यः । अनेन सम्बन्धेनेदं शास्त्रमारभ्यत इति । अन्यथा ह्यसंबद्धप्रलापिता स्यात् । सत्यम् । इह तु सर्वेषां प्रयोज-
नोऽन्यैर्वार्थो ज्ञायत इति न सूत्रकारेण पृथगुक्त इत्यदोषः । अथेदं चिन्त्यते । किमध्ययनानन्तरं धर्मजिज्ञा- रामः
सया गुरुकुले वस्तव्यम् उत गुरुकुलात्समावर्तितव्यमिति । यदि स्वाध्यायाध्ययनविधिना धर्ममार्गार्थ- १

प्रयोजनेन सहास्य साध्यसाधनसंबन्धः स एव शास्त्रस्य प्रस्तावको नान्यः । भवति हि साधनत्वमेव साध्यार्थिनः
साधने प्रवृत्तिहेतुः स चायं सम्बन्धः ×३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मध्ययनं स्वर्गायविधीयते ततस्तन्मात्रेणैव शास्त्रार्थस्य समाप्तत्वादधीत्यस्नायादितिस्मृतिबलेनसमावर्त्तिनं स्या

पं मा अथत्वक्षरादिग्रहणपरोपजायमानवाक्यार्थज्ञानार्थमध्ययनं विधीयते तेन तस्य विचारमन्तरेणासम्भवादध्ययन नम

विधिनैवार्थाद्विचारोपि विहित इति गुरुमतरहस्यावस्थायधर्मो विचारयितव्यः। ननु विनापि विधिना दृष्टलाभान्न हि न

दर्थनाकल्प्यस्तु विधिस्सामर्थ्यात्स्वर्गो विश्वजिदादिवत्। स्वाध्यायसंस्कारद्वारेणाध्ययनस्यार्थज्ञानहेतुत्वं विनैव

३० विधिना प्रमाणान्तरेण सिद्धमिति नादृष्टे विध्यानर्थक्यम्। न चावघातादिवन्नियमार्थत्वम्। अवघातो हि दर्शपू

र्णमासापूर्वे नियम्यते। अवघातनिष्पन्नैरेव तण्डुलैरपूर्वं सिद्ध्यतीति। न च तण्डुलस्वरूपे प्रमाणान्तरविरोधात्

तद्वदिहापि ज्ञानस्याध्ययनमन्तरेणापि दर्शनात्तत्स्वरूपे नियमासम्भवात् क्रत्वपूर्वे स्वैव नियमो विधातव्यः। अधी

तैरेव वेदैरवगतानि कर्माणि स्वफलं ददतीति। न चैतद्युक्तम्। अकृतार्थत्वादध्ययनस्य। अनारभ्याधीतत्वाच्छ

मायभावाच्च। तस्माददृष्टार्थमेव स्वाध्यायोध्येतव्य इत्यध्ययनमात्रेणैव शास्त्रार्थसमाप्तेर्गुरुकुलात्समावे

र्त्तितव्यमिति प्राप्तेऽभिधीयते। लभ्यमाने फले दृष्टे नादृष्टस्य प्रकल्पना॥ विधेस्तु नियमार्थत्वान्नानर्थक्यं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२ × स्वधीतवेदानां त्रैवर्णिकानामेवाधिकारो नानधीतवेदानां शूद्राणामित्यधिकारनियमः सप्रयोजनमध्ययनवि
धेः तथा हि अस्मत्यध्ययनविधाव्ग्निहोत्र ×२

भविष्यति। ज्ञानस्वरूपेऽकृत्वपूर्वे वा नियमो न संभवतीति यदुक्तं तदभिधीयते नोभयथा(वि)ब्रूमः। कथं तर्हि योयम
शा·दी· २ ग्निहोत्रादिशास्त्राणि विद्वांसमलभमानानि अविद्वांसमेवाधिकुर्युस्तद्विद्यामन्तरेणानुष्ठानासंभवाद्विद्यामा
क्षिपन्त्यविशेषाच्चतुरो वर्णानधिकुर्युः। सति त्वध्ययनविधौ त्रैवर्णिकानामेव विदुषामधिकारो भवति न
तु शूद्रस्य। तथा हि। वसन्ते ब्राह्मणमुपनयीतेत्यादिषु द्वितीयानिर्देशादुपनयनसंस्कृतास्त्रैवर्णिकाः किमस्मा
भिः कर्त्तव्यमित्यपेक्षन्ते। तत्सन्निधौ चाध्ययनमनिर्दिष्टकर्त्तृकं विधीयमानं कर्त्तारमपेक्षते। तत्रापेक्षास
न्निधियोग्यत्वैरेवं ज्ञायते त्रैवर्णिकैरुपनीतैरध्ययनेनाक्षरग्रहणादिपरंपरयार्थज्ञानं कर्त्तव्यमिति। ए
वं च फलवदध्ययनकर्त्तृभूतमाणवकसंस्कारत्वादुपनयनमध्ययनाङ्गम्। अध्ययनमपि दृष्टार्थज्ञाना
र्थम्। अर्थज्ञानं चानुष्ठानोपयिकत्वात्प्रसिद्धफलकमेवेति सर्वेषां फलवत्त्वम्। एवं च त्रैवर्णिकेषु सत्सु
विद्वत्सु नाग्निहोत्रादिविषयश्चतुर्थस्य विद्यामाक्षिपन्ति किन्तु त्रैवर्णिकानेव विदुषोऽधिकुर्वन्ति। सोयम
धिकारनियमो यः शूद्राधिकरणे वक्ष्यमाणोऽध्ययनविधिप्रसादलभ्य इति फलेनानेवं विधिः। तेनार्थज्ञाना राम: २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यस्मान्नमध्ययनमध्ययनविधिना विधीयत इति विचारमन्तरेण तदनुपपत्तेरध्ययनविधिरेव विचारमाक्षिपतीत्युक्तं तस्मा
न्नैरन्तर्यं नाधत इति सिद्धमध्ययनानन्तरं धर्मजिज्ञासा कर्तव्येति । केचित्पुनराचार्यकरणविधिप्रयुक्तमध्ययनमस्याङ्गीकृ
त्य किमाचार्यकसिद्धिरेवास्य प्रयोजनमुतार्थज्ञानमपीति विचार्यान्तरङ्गत्वादर्थज्ञानमित्याहुः । किं पुनः कारण
माचार्यकरणविधिप्रयुक्तत्वेऽध्ययनस्य । अध्ययनविधेरधिकारशून्यत्वादाचार्यकरणविधिप्रयुक्त्या चात्मला
भे विश्वजिदादिवत्कल्पनानुपपत्तेः । कः पुनराचार्यकरणविधिः । कथं वानेनाध्ययनस्य प्रयुक्तिः । उच्यते । उ
पनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः । सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते इति स्मृत्यनुमितमुपनीयाध्या
पनेनाचार्यत्वं भावयेदित्याचार्यकरणविधिः । अत्र चाध्यापनमाचार्यत्वसाधनम् । उपनयनं तु तत्कालप्रत्यया
त्तस्यैवाङ्गम् । तत्र केन द्वारेणाध्यापनस्योपकरोतीत्यपेक्षायामुपनेयासत्तिरेव द्वारत्वेनाङ्गीक्रियते । नि
ह्नान्तु । उपनीतोऽपि नाकिञ्चित्करोऽङ्गमिति निर्व्यापारापेक्षायामुपनयनं प्रक्रम्य विहितमध्ययनमध्याप
नोपकारित्वादुपनीतस्य व्यापारत्वेनाध्यवसीयते । तदेवं स्वाङ्गभूतमुपनयनं प्रयुञ्जानोऽध्यापनविधिस्तद्द्वा

शा॰ दी॰ ३

रेणाध्ययनं प्रयुङ्क्ते॰ तदिदमनुपपन्नम्· तथाहि· । न नियोगार्थस्याध्ययनस्याचार्यत्वप्रयोजनतार्थज्ञानप्र-
योजनता च शास्त्रेण शक्यते बोधयितुम्· साध्यद्वयस्यैकत्रासंभवात्· नियोगार्थतैव शास्त्रेण बोध्यते अर्थज्ञा-
नार्थता यां तु अनु॰मतिमात्रमिति चेत्· तथाप्यर्थद्वयं स्यादेव· किंचैवं सकृदुच्चारितस्य लिङ्प्रत्ययस्य विरुद्धार्थ-
त्वमनुज्ञानार्थत्वं चेति वैरूप्यमपि स्यात्· तेन संशयस्यानुपपन्नः· तथा सिद्धान्तोप्यनुपपन्न एव· प्रमाणा-
न्तरासिद्धत्वादर्थज्ञानार्थत्वं न शास्त्रगोचरतामनुभवतीति· तच्च यदेवास्मदभिप्रेतं विधेर्नियमार्थत्वं महता प्र-
यत्नेन भवद्भिर्दूषितं तदेव भवद्भिर्विमुक्तलज्जैरनन्यगतिकत्वादाश्रयणीयमापन्नम्· नियमानङ्गीकारे
हि पूर्वपक्ष एव श्रेयानापद्येत· आचार्यत्वस्यादृष्टत्वेन प्रयोजनत्वोपपत्तेः· अर्थज्ञानार्थत्वे चाध्ययनं स्वा-
ध्यायसंस्कारे नियोगार्थत्वेनु प्रधानं कर्मेति वैरूप्यमपि स्यात्· अर्थाज्ञानमर्थज्ञानं प्रयोजनं न शास्त्रात-
रणचेत्· आचार्यत्वमपि प्रयोजनं न स्यात्· तस्याप्यर्थाज्ञातत्वात्· स्मृतिबाधेन चत्वानोक्तवो न स्यात्· अ-
ङ्गत्वस्वीकृतत्वाद्विचारस्य· किंच· नियोज्यः कल्पनीयो ज्ञा विरुद्धार्थानुपपत्तितः· तच्चोनयनस्याङ्गभा- रामः ३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वोस्याध्यापनंपुनि·द्वितीयाश्रुतिसामर्थ्यात्माणवकसंस्क्रिया·तथासत्यङ्गत्वादङ्गमध्ययनस्यतत्·यत्तावन्नि
योज्याभावादप्रयोजकत्वमध्ययनविधेरिति·तदयुक्तम्·अभावासिद्धेः·स्थुतस्यापिविश्वजिदादिवत्कल्पनात्·कार्यं
हिविज्ञर्थः·सम्बन्धिशब्दश्चायंकार्यमिति·कस्यचित्किंचित्कार्यम्भवतिनसर्वंसर्वस्य·अतःकस्येदंकार्यमित्य
स्तिसम्बन्ध्यपेक्षा·सावश्यमध्याहृतेनकेनचिन्निवर्तनीया·अस्येदंकार्यमिति·यस्येदंकार्यंसएवनियोज्यइत्यु
च्यते·यद्यपिकथंचित्स्वर्गपुत्रानुष्ठानादात्मलाभःस्यात्तथापिनतावताकार्यत्वंसिद्ध्यति·नहिकृतिसाध्यता
मात्रंकार्यत्वम्·किन्तर्हियत्कृतिसाध्यंकृतिंप्रतिप्रधानभूतंतत्कार्यमित्युच्यते·प्राधान्यंचकृतेस्तदुद्देशेनप्रवृ
त्तिः·ततश्चाध्ययननियोगेनकार्येणभवता·अवश्यंपुरुषव्यापारोद्देशेनभवितव्यम्·नचासतिनियोज्येत
दुद्देशेनकश्चित्प्रवर्तते·अध्यापनविधिनाहिप्रवर्त्यमानोमाणवकः·कथंचिदध्ययनमात्रमनुतिष्ठेन्नत्व
पूर्वमुद्दिश्य·नहितस्यतदुद्देश्यम्·प्रमाणाभावात्·प्रयाजाद्यपूर्वाणिदर्शपूर्णमासापूर्वोपकारकत्वा
त्तदधिकृतेनपुरुषेणतत्सिद्ध्यर्थमुद्दिश्यक्रियमाणानीतियुक्तंयदसत्यपिसाक्षान्नियोज्योपादा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

* नचैकप्रयोगताकल्प्यते· अङ्गाङ्गिभावबलादेकप्रयोगतावशात्कल्पनीयः· द्वितीयपादे तु साक्षादङ्गत्वमेवोच्यते· *४

शा·दी ४ नैकार्थ्यत्वं मन्ये· अध्ययननियोगस्य तु नान्योपायिकत्वम्· यतस्तद्रूपेणाद्वैरूपता स्यात्· अर्थज्ञानस्य च विषयफ-
लत्वेन नियोगानपेक्षत्वात्· तस्मादस्य कार्यत्वसिद्धये कश्चिन्नियोज्यः कल्पनीयः· यद्वाध्यापनविधेरुप-
नयनद्वारेणाध्ययनप्रयोजकत्वमुक्तम्· तदप्ययुक्तम्· उपनयनप्रयुक्तेरेवाभावान्न द्वारेणाध्ययनप्रयुक्ति-
र्दूरापास्ता· स्वाप्रत्ययेनाहमस्मान्न कर्तृकत्वमेवोच्यते· अतो यथा त्रिवृता यूपपरिव्याणं यूपार्थत्वोपका-
रार्थम्· एवमुपनयनमपि माणवकसंस्कारार्थं नाध्यापनार्थम्· स्मृतिगतश्च स्वाप्रत्ययः प्रत्यक्षश्रुतिगता-
नुवसन्ते ब्राह्मणमित्यादि· तृतीया· अतोपि माणवकार्थत्वम्· भवतु माणवकसंस्कारस्तद्द्वारेणत्वध्यापनाङ्गं ना-
ध्ययनाङ्गमिति चेत्· नैवम्· अन्तरङ्गत्वादध्ययनस्य तादर्थ्यमेव संस्कारस्य युक्तम्· अध्ययनमपि फलवत्
अध्यापनमपि तयोः कस्यायं माणवकसंस्कारोङ्गं भवत्वित्यपेक्षायामध्यापनस्य पुरुषान्तरगामित्वेन बहि-
रङ्गत्वान्माणवकगताध्ययनार्थत्वमेव युक्तम्· यथैव ह्यध्ययनस्याचार्यकसिद्धिप्रयोजनमनादृत्य वे-
दमधीत्य स्नायादिति स्मृतिं बाधित्वान्तरङ्गत्वादर्थज्ञानार्थत्वमाश्रीयते· तथोपनयनस्याध्यापनार्थता राम: ४

मे वेदितव्याः स्मरणादपि पाणिनीयादध्ययनाङ्गत्वेनोपनयनस्यावगम्यते अध्ययनाङ्गतां हि स्मरन्नाचार्यकरणे नयते
रात्मनेपदं विधत्ते अध्यापनाङ्गत्वे हि कर्त्रभिप्रायत्वात्क्रियाफलस्य शित्वादेवात्मनेपदंसिद्धेर्न उपनीय तु यः शिष्य
मिति क्त्वाप्रत्ययो हि कथंचिद्वृत्तौ पूर्णमासाभ्यामिष्टुतिवदसत्यप्यङ्गाङ्गिभावेऽवकल्पते पुनर्विधानं चात्मने
पदस्यात्यन्तानर्थकम् तस्मादध्ययनाङ्गमुपनयनं स्यात् नत्वात्तज्जन्यः संस्कारो हि माणवकसमवायी स
त्यम् माणवकसमवेतोपि न तदर्थः कर्त्रर्थत्वं च फलस्य कर्त्रभिप्रायत्वम् ननु तत्समवायः अन्यथाह
नीनादधीते स्यात्मनेपदं न स्यात् आधानफलस्याहवनीयत्वादेरग्निसमवेतत्वेन कर्तृसमवायाभावात् उ
इयं च स्मृतिरुपनीय तु यः शिष्यमिति अतो बलीयसी द्वितीया श्रुतिः तस्मान्नाध्यापनाङ्गमिति न तद्वारेणा
ध्यापनस्य प्रयुक्तिः यद्वोपनीतस्य व्यापारापेक्षायामुपनयनं प्रक्रम्य विहितमध्ययनं तद्व्यापारत्वेना
ध्यवसीयत इति नत्वबुद्धिपूर्वकम् एवं हि वदताध्यापनाङ्गमध्ययनमित्युपपादितं भवति यदाप
ध्यापनार्थत्वेनोपनीतस्य माणवकस्य तदुपयोगिव्यापारापेक्षायामध्ययनविधिरेवाध्ययनं तदुपर

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग. टी.
५

योगिव्यापारमयाविधत्ते । एवं चैवर्णिके ह्युपनीतेरध्यापनोपयिकव्यापारापेक्षैरध्ययनव्यापारः कर्तव्य इ
ति तदास्ययमे वाध्यापनत्रोप्यध्ययनमिति दूरनिरस्तमर्थज्ञानार्थत्वमिति सुनिरूपितो वाक्यार्थः । अ
थाध्ययनविधिरध्ययनमर्थज्ञानार्थतयैव विधत्ते । नाध्यापनोपयिकतया । तदा स्वाध्ययनस्य तदौ
पयिकत्वं केन प्रमाणेन गम्यते । न चात्र ——— प्रत्यक्षादीनि क्रमन्ते । सन्निधानादिनि चेत् । न सन्नि
धानं नाम स्वयं प्रमाणम् । शब्दस्य त्वर्थप्रतिपादयतः सन्निध्यपेक्षा योग्यत्वानीनि कर्तव्यता । नेत्र
स्य चोन्मीलनम् । वाक्यश्चेदध्यापनोपयिकतया विदध्यान्नार्थज्ञानार्थता सिध्येत् । अर्थज्ञानार्थतया
विधानेऽध्यापनोपयिकता न सिध्येत् । अतो नोपनयनसन्निधौ स्वाध्यायोऽध्येतव्य इति विहितस्या
ध्ययनस्योपनयनद्वाराध्यापनविधिना प्रयुक्तिसम्भवः । यद्दिपरमध्यापनस्याध्ययनमन्तरेणासं
भवात्पदार्थस्वभावेनाध्ययनमाक्षिप्यते । तथा सत्यविहितेन लौकिकेनाध्ययनेन तत्सम्भवान्न
विहितस्याध्ययनस्य नियोगतः प्रयुक्तिः । न च प्रयुक्तिलाघवादपि विहितोपजीवनम् । तदुपजी

राम:
५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वनेपि प्रयुज्यमानत्वलोपात् । विहितमप्यध्ययनमध्यापनविधिनैव लब्धमनेन प्रयुज्यते न स्वविधिना । तस्माल्लौकिक
मेवाध्ययनमुपनीतानामध्यापनविधिराक्षिपेत् । विहितमध्ययनं परप्रयुक्त्यभावादधिकारं प्रकल्पयेत् । किं
च । यद्युपनयनमध्यापनाङ्गं ततोध्ययनविधिरर्थज्ञानार्थः स्वाध्यापनार्थतयोपनीतानीतेस्त्रैवर्णिकैः सुख
ज्ञेन येध्यापनार्थतयोपनीतास्त्रैवर्णिकास्तदुपयोगिव्यापारमपेक्षन्ते नेर्थज्ञानार्थमधीयीरन्नित्यसंबद्धार्थमे
वस्यात् । ततश्चोपनीतैरसंबध्यमानोध्ययनविधिश्चतुर्णामपि वर्णानां स्यादिति शूद्राधिकारप्रसङ्गः । तस्मा
दुपनीतानां प्रयोजनापेक्षितगामध्ययनं करणकार्थज्ञानभावना विधीयत इत्यध्ययनाङ्गमेवोपनयनम् ।
स्वविधिप्रयुक्तं चाध्ययनम् । प्रपञ्चेनायं पक्षो न्यायरत्नमालायामेव निरस्त इत्युपरम्यते । तस्मात्पूर्वोक्त ए
व विचारः किमदृष्टार्थमध्ययनमुताक्षरग्रहणादिपरम्परयार्थज्ञानार्थमिति । अथवा नात्र किञ्चिद्विचा
र्यते । नावमिकन्यायेनैवाध्ययनस्याक्षरसंस्कारादिपरम्परयार्थज्ञानार्थत्वसिद्धेः । नवमे हि साम्नामृग
क्षराभिव्यक्तिद्वारेण स्तुत्युपयोगित्वदर्शनात् तादर्थ्यमेव । नादृष्टार्थत्वमिति वक्ष्यते । तेनैव न्यायेनाध्यय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मी. टी.
८

नस्यार्थज्ञानार्थत्वसिद्धेरध्ययनानन्तरं धर्मजिज्ञासा कर्त्तव्येति सिद्धमेवेतन्न प्रयोजनविवक्षया सूत्रकारेणो
च्यते यदाहुः धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनमिति नावगकस्यचिद्वेदस्य वाक्यार्थो विचार्य
ते यथाहुः न चात्र चोदनाव्याख्यागौरवं तत्र चोदितमिति नन्विदमध्ययनानन्तरं धर्मजिज्ञासा कर्त्तव्ये
ति साक्षाद्धो धर्मस्वरूपप्रमाणसाधनफलैः नन्वध्ययनविधिना वेदवाक्यार्थो धर्मस्याच्छेदश्च प्र
माणान्तरासो विचारः कर्त्तव्यो भवति स्वरूपाकाक्षेपादिवस्यात् नह्यध्ययनविधिरेव प्रमाणा
दिविचारमप्याक्षिपति धर्मग्रहणं चोपलक्षणार्थम् अधर्मस्यापि हानाय जिज्ञास्यत्वा
त् अकारप्रश्लेषेण वा सूत्रमधर्मजिज्ञासायामपि व्याख्येयमिति निरवद्यम् ॥ ॥

चोदनालक्षणोर्थो धर्मः ॥ ॥प्रथमं तावत् को धर्मः कथं लक्षण क इत्येते द्वयमनेन
सूत्रेण श्रुत्यर्थाभ्यां निरूप्यते यो धर्मः स चोदनालक्षणः चोदनैव तस्य लक्षणं मे
वेति श्रुत्या प्रमाणविषयावर्थो चोदनागम्यस्त्वग्निहोत्रादि धर्मो नातल्लक्षणा —

राम:
८८

र्थ विचारमोगाक्षेपाद्धर्मस्वरूपप्रमाणजिज्ञा
सयोः कः प्रसङ्गः उच्यते अयोद्यानत्वात्प्रसङ्गः
४× यद्विहवेदवाक्या ×४

चैत्यवन्दनादिरिति स्वरूपमपि सिद्ध्यति· तथा यथोदनालक्षणः स धर्म इति स्वरूप विधावर्थात्प्र
माणसिद्धिर्वेदितव्या· कश्चिदाह· कार्यरूपो वेदार्थो न सिद्धरूप इत्यनेन सूत्रेणोच्यते· चोदनाल
क्षणशब्देन कार्यमुच्यते· धर्मशब्देन वेदार्थ उक्तः· नन्वस्तु नाम· यानि तावद्विधिवाक्यानि तेषां विधावेव प्र
माणत्वम्· वस्तुस्वरूपे चाप्रामाण्यं विस्पष्टमेवोक्तं तेन तत्र किंचिद्वक्तव्यम्· क्षेपकादिवाक्यानामपि वि
ध्येकवाक्यतयात्रैव प्रामाण्यम्· मन्त्राणामपि प्रकरणेन प्रधानशेषत्वं द्वितीये पादे वक्ष्यते इति न तत्रापि
वक्तव्यमस्ति· तेन कस्यात्र सिद्धार्थता निरस्य कार्यार्थतोच्यते· अविनाशी वा अरेऽयमात्मेत्यादीना
व मुपनिषद्वाक्यानामिति चेत् तेषामपि यदि विध्येकवाक्यत्वमस्ति ततोऽर्थवादाधिकरणेन गतम्· अथ
नास्ति· कथं तेषां कार्यार्थता स्यात् अथ तेषां विध्यन्तराणि विध्यन्तरेणैकवाक्यत्वाभावाच्चाकार्यत्वा
दुपपत्तेर्व्युत्पत्तिविरहाच्च सिद्धार्थे प्रामाण्यायोगादप्रामाण्यमेवाभिहितम्· किमिदानीमात्मादि

ति

वाक्यानामप्रामाण्यप्रतिपादनपरमिदंसूत्रम् सुव्याहृतम् · तर्हि शास्त्रारंभे प्रथमन्तावत्सूत्रकारेण प्रामाण्यमेव
वेदवाक्यानां प्रतिपादयितव्यमिति · कथंच कार्य एव प्रामाण्यम् · तत्रैव व्युत्पत्तेः · प्रवृत्त्यधीना हि व्युत्पत्तिः · सा च कार्या
वगमाधीनेति व्युत्पत्तिरपि तत्रैव भवतीति चेत् · नावश्यं प्रवृत्त्यधीनैव व्युत्पत्तिः · काष्ठैः स्थाल्यामोदनं पचती त्यादि
वर्त्तमानापदेशेष्वपि प्रसिद्धतृतीयार्थानामप्रसिद्धकारकप्रातिपदिकार्थानां च पुरुषाणां काष्ठार्थे व्युत्पत्तिद
र्शनात् · प्रथमव्युत्पत्तिः कार्यविषयैव · नहि तदा शब्दान्तरवत्तेन शब्दान्तरव्युत्पत्तिः सम्भवति सर्वस्याप्रसिद्ध
त्वादिति चेत् · अस्त्वेवम् · तथापि बहुशः पश्चात्सिद्धार्थप्रयोगदर्शनात् कोयं राजा पाञ्चाल इत्यादिषु प्रथमप्र
तिवचनादिषु कार्यस्य व्यभिचाराद व्यभिचार्यर्थमात्रं वाच्यमिति युक्तम् · यथैव हि कस्यचित्प्रथमं गो
शब्दस्य प्रयोगदर्शनात् सैव वाच्येत्यवगमे सत्यपि व्यक्त्यन्तरे प्रयोगं दृष्ट्वा पूर्वव्यक्तिव्यभिचारादव्यभिचा
रिसामान्यमेवार्थ इत्यध्यवसीयते · तथा कार्यपरतामवगतामपि पश्चात्सिद्धार्थप्रयोगदर्शनेन बाधित्वा
र्थमात्रमेवाव्यभिचाराद्वाच्यमिति युक्तम् · किञ्च प्रथमव्युत्पत्तौ कतिपयानामेव शब्दानां कार्यपरत्वमवगत

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मृ· न सर्वशब्दानाम्· अतः पश्चाद्व्युत्पाद्यमानस्य काष्ठादेः सिद्धार्थव्युत्पत्तिः केन वार्यते· न च व्युत्पन्नो शब्दानां पौर्वापर्यनि
यमोस्ति· अतः सर्वशब्दाः पश्चाद्व्युत्पाद्यमानाः केचित्सिद्धार्था भवन्ति· सर्वेषां च कार्यार्थत्वे सिद्धार्थपरेषु लौकिकवाक्ये
षु सर्वशब्दानां लाक्षणिकत्वान्न कश्चिदन्विताभिधायी स्यात्· तत्रान्वितप्रतीतिः कथं सिद्ध्येत्· वक्तृज्ञानानुमानादिति
चेत्· न यद्विषयकं हि वाक्यं तद्विषयकमेव वक्तृज्ञानमनुमापयेत्· न चान्वितप्रतिपादकं वाक्यमुच्चारितमिति कथम
न्वितज्ञानानुमानम्· अपार्थस्वरूपस्मारकैः पदैरन्वितज्ञानमनुमीयते· ततः कार्यताविन्यपि सिद्धेरन्विताभिधानं
स्यात्· किं च पृथगर्थमेव कार्यव्यभिचारः शक्योवगन्तुम्· यथा हि पुत्रस्ते जात इत्युक्तस्य कस्यचिन्मुखविकासं
पार्श्वस्थः पश्यति· तदा हर्षहेतुरनेन शब्देन प्रतिपादित इति हर्षहेतुभूतसिद्धार्थप्रतिपादने शब्दस्य सामर्थ्यं कल्प
यति· यद्यपि च तदानीमर्थविशेषो न ज्ञायते हर्षहेतूनां बहूनां संभवात्· तथापि सिद्धार्थता तावदवगता तावता
पि कार्ये व्यभिचारः सिद्धः· किं च बहुशः पुत्रजनने सत्येवं शब्दप्रयोगादन्येषु हर्षहेतुष्वप्रयोगात्पुत्रजनना
र्थविशेषोपि ज्ञात एव· किं च प्रत्यक्षाधीनापि व्युत्पत्तिर्नावश्यं कार्यविषयैव भवति· तथा हि· यदा कश्चित्प्रद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तावत्पन्नसमर्थं ... मातुरं वा प्रतिविनोदार्थवाक्यं प्रयुज्यते · नद्यास्तीरे फलानि सन्तीति · तत्रान्योदेव सङ्गतः कश्चि
दर्थो तद्वाक्यमर्थो ... त्वा न दीतीरं गत्वा फलान्याहरति · एतत्सर्वं परस्परान्योन्यसम्बन्धः फलसद्भावप्रतिपादने ग्राह
स्य सामर्थ्यं प्रतिपद्यते · तस्मान्नैकान्ततः कार्यार्थता शब्दानाम् · का वास्य सूत्रस्य वचनव्यक्तिः · यदि तावद्यत्कार्यं
प्रतिपद्यते · तस्मान्नैकान्ततः कार्यार्थता । नहि वेदार्थस्येति कार्यमुद्दिश्य वेदार्थता स्यात् · किं चोपादेयस्य वेदा
र्थस्योद्देश्ये न कार्यरूपेणाग्नेर्विधूमेनाव्याप्तेः कार्येपि वेदस्य प्रामाण्यमनिरस्तं स्यात् · अथ यो वेदार्थः स
कार्यरूप एवेति · ततो यो धर्मः स चोदनालक्षणादिति च न व्यक्तिः स्यात् · तत्रार्थग्राहको यद्युपादेयवाचीकस्यवि
शेषणम् · यदुपादेयस्य चोदनालक्षणपदार्थस्य ततः सर्वस्य वेदार्थस्य कार्यत्वमर्थत्वं च विधीयत इति
श्येनादिनियोगानामप्यर्थत्वं स्यात् · अथोद्देश्यपदं वेदार्थविशेषणम् · ततोयमर्थो भवति · योर्थात्मको भ्यु
दयात्मको वेदार्थः स कार्यरूपः · तथा च श्येनादिनियोगान्निषिद्धफलत्वेनानभ्युदयरूपाणां कार्यता
न स्यात् · मा भूदिति चेत् · न · तेषामपि लिङादिकार्यतावगमात् · श्येनयागस्य कार्यतानिवारयितुं शक्यते न

[illegible]

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नियोगस्य · तस्य कार्यैकस्वभावात् · असति च कार्यत्वे रूपेण वाक्यस्य कार्यार्थत्वाभावात्सि-
द्धार्थतैव वक्तव्या स्यात् · न च तथा संभवति · विधिप्रत्यययोगात् · सिद्धे चार्थे प्रत्यन्ते विर-
हादप्रामाण्यमेव रूपेणादिवाक्यानां स्यात् · अथ पूर्वसूत्राद्वेदार्थपरं धर्मपदमनुषज्य चो-
दनालक्षणो वेदार्थ इत्येकं वाक्यमर्थो धर्म इत्यपरं वाक्यम् · तदिदं स्वप्रज्ञाविलसितमात्रम् · अनुषङ्ग-
वाक्यभेदयोर्विना फलमाश्रयणात् · अप्रतिज्ञानस्य च धर्मस्य लक्षणमसङ्गतम् · अप्रतिज्ञानस्यैव वे-
दार्थस्य कार्यत्वासिद्धये धर्मत्वमुच्यते · किं कार्य एव धर्मरूपो वेदार्थः स एव जिज्ञास्यो न सर्वः · तथा च य
एव जिज्ञास्यो धर्मस्तस्यैव सूत्राक्षराविनाशेन जिज्ञासा प्रतिज्ञातव्येति वेदार्थजिज्ञासावचनमनर्थक-
म् · अथ त्वर्थशब्दमनादृत्य यो वेदार्थः स कार्यरूप इत्युच्यते ततोऽर्थपदमनर्थकं वानुमात्रपर्यायमननुवाद-
कं स्यात् · अनर्थक्यमुदासार्थता चास्य भाष्यकारेणोक्ता · तस्माद्विशेषणमेवैतत् · विशेषणत्वे चाभ्युद-
यरूपस्य वेदार्थस्य कार्यत्वाभिधानादनभ्युदयरूपस्य कार्यत्वं न स्यादिति सर्वस्य वेदस्य कार्यत्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शा॰दी॰ ९ प्रामाण्यमिति नियमो न स्यात्· तत्रश्चाविनाशी वा अरे ऽयमात्मेत्यादीनामात्मस्वरूपपरत्वेन निराकर्त्तव्यमित्यास्तां ता
वत्· तस्माद्धर्मस्वरूपप्रमाणप्रतिपादनार्थमेवेदं सूत्रम्· तदिह धर्मविषयी कृत्य चिन्त्यते· किमस्य नास्ति किञ्चित्प्रमाण
मस्ति· किं वा प्रत्यक्षादिकमेव प्रमाणम्· उत चोदनैव· अथ किं प्रत्यक्षादिः अथवा समुच्चय इति· तत्र तावत् स्वप्रमाणान्तरप्रा
प्रापकत्वेन स्वयमप्रमाणत्वात्· प्रत्यक्षादीनां चासामर्थ्यादप्रामाणिको धर्म इत्येकः पक्षः· प्रत्यक्षादीन्यस्य स्वे
त्येकः· योगिनां प्रत्यक्षगम्यो ऽर्वाचीनानां तु चोदनागम्य इत्यपरः· यागे हि व्यापृते किमप्यदृष्टमस्तीति सामान्येन
प्रसिद्धो धर्मश्चोदनयाग्निहोत्रादिविशेषरूपेण गम्यते· तस्मात्समुच्चय इति पक्षान्तरम्· चोदनैव प्रमाणं सा च
प्रमाणमेवेति सिद्धान्तः· तदिह चोदनैव प्रमाणं प्रमाणमेवेत्यवधारणद्वयं प्रतिज्ञायते। निमित्तसूत्रे तु प्रथमद्वि
तीयसूत्रप्रमाणालोचनया वेदो धर्ममूलमित्यादिवदुपदेशशास्त्रत्वाशङ्का मा भूदिति परीक्षाशास्त्रमिति
ज्ञापयितुं परीक्षाप्रतिज्ञानम्· यद्यपि चोपरितनव्यापारादेव परीक्षाशास्त्रत्वं गम्यते· तथापि वक्ष्यमाणमेव
श्रोतृबुद्धिसमाधानाय कीर्त्तितम्· प्रत्यक्षस्य हेतु प्रत्यक्षस्यापि विद्यमानोपलम्भनत्वादविषयतिधर्मे प्रामाण्या राम: ६

संभवान्नत्पूर्वकत्वेन चेन्नेरेणामप्यप्रामाण्यात्प्रमाणान्तरनियमविकल्पसमुच्चयनिराकरणाच्चोदनैवेत्ययमर्थः सिद्धमिति औ
त्पत्तिकसूत्रे तु स्वतःप्रामाण्यमर्थोन्यथात्वकारणदोषज्ञानाभ्यामप्रामाण्यमित्याश्रित्याग्निहोत्रादिचोदनाभ्यो संदिग्
धत्वानोत्पत्तेः स्वतःप्रामाण्यम् । न चापवादकमर्थान्यत्वज्ञानं साक्षादस्ति । नापि कारणदोषज्ञानम् । पुरुषाश्रयत्वा
द्धि दोषाणाम् । पदपदार्थसंबन्धस्याकृत्रिमत्वान्नद्वारेण पुरुषानुप्रवेशाभावाच्चोदनानामिति स्थिते शब्दस्ये
वानित्यत्वात्कृतः सम्बन्धनित्यतेत्याक्षिप्य शब्दस्य नित्यतया शब्दाधिकरणे सम्बन्धनित्यत्वे समाहिते मा भू
त्पदार्थसंबन्धद्वारेण पुरुषानुप्रवेशः । वाक्यवाक्यार्थयोस्तु लोके सम्बन्धादर्शनान्निर्मूलोग्निहोत्रादिवाक्यार्थ
प्रत्यय इत्यतो व्यामोहः सामयिको वा । अतो न वाक्यार्थे वेदस्य प्रामाण्यमित्याशङ्क्य पदार्थानां संबन्धग्रहणं स
मयं चानपेक्षमाणानामेव वाक्यार्थे प्रामाण्यं संभवतीति तत्कृताधिकरणे न प्रतिपादिते पुनर्वेदानां वाक्यात्म
कत्वात्काठकादिसमाख्यानाच्च पौरुषेयत्वान्नद्वारेण दोषसंस्पर्शे नमाशंक्य स्मर्तृत्वे स्मृत्यस्मरणाद्योगानु
पलब्धिनिरस्तस्य कर्तुरनुमानासंभवात्समाख्यायाश्च प्रवचननिमित्तत्वादपौरुषेया वेदा इति तदेकदेशानां

चोदनानां सिद्धं प्रामाण्यमिति एवं समस्तः प्रथमः पादश्चोदनासूत्रप्रतिज्ञातार्थोपपादने तत्तस्यैव परिकरः सोयं भाष्य
कारानुसारेण पदार्थोनुक्रान्तः ध्वनिकारमतं तु पश्चाद्लुकमिष्यामः प्रकृतं चानुसरामः प्रतिज्ञातं तावच्चोदनैव
प्रमाणं सा च प्रमाणमेवेति नतु प्रत्यक्षादेरनपेक्षं प्रामाण्यं संभवतीति तस्यैव धर्मे प्रामाण्यम् शब्दस्य तु सर्वदैव प्रमा
णान्तरप्रमितविषयत्वान्न तदपेक्षं प्रामाण्यं संभवति उच्यते प्रत्यक्षं तावत्संयुक्तविषयत्वेन विद्यमानोपलम्भक
त्वाद्भविष्यति धर्मे न समर्थम् यद्यपि गोदोहनादिद्रव्ययागादिः क्रियानीचे दिश्यतेश्च फलसाधनत्वाद्धर्मत्वा
देनोच्यते नापूर्वादयइति श्लेयस्करम्भाष्ये वक्ष्यते तथापि तेषां फलसाधनरूपेण धर्मत्वात् फलस्य च जन्मान्त
रादिभावित्वाद्धर्मस्वरूपेण प्रत्यक्षविषयत्वं न सम्भवति तत्पूर्वकत्वाच्चानुमानादिकमपि निष्प्रमाणम् भाव
नाबलजन्तु योगिप्रत्यक्षं धर्मे भविष्यत्यपि समर्थमिति मनोरथमात्रम् भावनाह्यनुभूतगोचरनियतानुभूते
रेव निश्चयरूपां स्मृतिं जनयेत् न च सा च प्रमाणम् स्मृतित्वादेव नतरां प्रत्यक्षमनिन्द्रियजत्वात् नेन्द्रियज
त्वप्रत्यक्षलक्षणमपि नु कल्पनापोढत्वमिति चेत् सुतरां धर्मस्याप्रत्यक्षत्वम् फलसाधनरूपस्यापि कल्पना

ग्रहणसंभवात् · तस्मादनिमित्तं प्रत्यक्षम् · तत्पूर्वकत्वाच्चानुमानाद्यपि · काश्यपीयाः पुनः प्रातिभा   धर्मे प्रमाण
माहुः · ननु लिङ्गाद्याभासजत्वात् प्रमाणाभासे वन भवति · किंपुनर्धर्मे · शब्दस्य तु बुद्धिजनकत्वादस्त्यपि वेदेषु मंत्रप्रामा
ण्यम् · ननु न बुद्धिजननमात्रात् प्रामाण्यं प्रयुक्तम् · अयथार्थेष्वपि वाक्येषु बुद्धिजननाविशेषात् · सत्यम् · तत्तु का
रणदोषबाधकप्रत्ययाभ्यां प्रयुक्तमप्रामाण्यम् वेदे तु तदभावात् स्वतः प्रामाण्यमनपोदितं भवति · कथं पुनः प्रामाण्य
स्य स्वतः प्राप्तिः · तदर्थमिदं सर्वज्ञानान्यधिकृत्य चिन्तनीयम् · किं प्रामाण्यमप्रामाण्यं चोभयं स्वत एवगम्यते अ
थवान्यतरदपि स्वभावेनानिरूपितं कारणगुणदोषप्रत्ययाभ्यामवगम्यते · आहोस्वित् प्रामाण्यं स्वतस्त्ववगम्यते ·
प्रामाण्यं तु कारणगुणज्ञानात् संवादज्ञानादर्थक्रियाज्ञानाद्वावधार्यते · उत प्रामाण्यं स्वतः प्राप्तं सदर्थान्यथात्वका
रणदोषज्ञानाभ्यामपगतेनाप्रामाण्येनापोद्यत इति · तत्र सर्वकारणानां स्वकार्ये शक्तेः स्वाभाविकत्वादुभय
मपि ज्ञानस्य स्वरसादेवावगम्यत इति केचित् · तदयुक्तम् · नहि ज्ञानं स्वविषयस्य तथात्वमतथात्वं च युगपद्बु
द्धौ निवेदयितुम् · विरोधात् · अथ कापि ज्ञानव्यक्तिः स्वप्रामाण्यस्य वाधयितुं काप्यप्रामाण्यमित्युच्यते · न

शा.दी. थापि नयुक्तम्. कारणान्तरनिरपेक्षस्य ज्ञानस्यैवोभयोपलम्भहेतुत्वे किं ज्ञानेन भवतीति न शक्यं विज्ञातुम्. अतोऽयमा
३३ पि स्वभावेनानिरूपितकारणं गुणदोषज्ञानाभावमवगम्यते इत्यपरे. तदप्यपेशलम्. एवं गुणदोषावधारणे
ऽप्यन्यतरेणाप्याकारेणाप्यर्थमनवगमयद्धि ज्ञानं निःस्वभावं स्यात्. तस्माद्यथाप्रामाण्यं स्वतः प्रामाण्यमनुसं
वादज्ञानादिभिरन्यत इत्ययुक्तम्. तथाहि. न ज्ञानमुत्पन्नमित्येतावतार्थतथात्वावधारणं युक्तम्. व्यभिचा
रादनिश्चयाच्चाप्रामाण्यमेव तस्यां वेलायां प्राप्तं पश्चात्कारणगुणज्ञानात् संवादज्ञानादर्थक्रियाज्ञानाद्वाऽप्रा
माण्यापवादाद्व्यपोह्यते. ज्ञाने चाप्राप्तप्रणीतत्वं गुणानां च वेदे न दृश्यते. अपौरुषेयत्वाभ्युपगमात्. अस्मत्पक्षे चा
प्राप्तप्रणीतत्वाभावात्. वनस्पतयः सत्रमासत. शृणोत ग्रावाणः. इत्येवमादीनामुन्मत्तप्रलपितकल्पत्वाद
प्रत्ययितप्रणीतत्वादप्रामाण्यमेव वेदानामिति प्राप्ते अभिधीयते. परापेक्षं प्रमाणत्वं नात्मानं लभते क्वचित्. मू
लोच्छेदकरं पक्षं को हि नामाध्यवस्यति. यदि हि सर्वमेव ज्ञानं स्वविषयतथात्वावधारणे स्वयमसमर्थं विज्ञा
नान्तरमपेक्षते ततः कारणगुणसंवादार्थक्रियाज्ञानान्यपि स्वविषयभूतगुणाद्यवधारणे परमपेक्षेरन्. अ राम:
३३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परमपि न तथेति न कश्चिदर्थो जन्मसहस्रेणापि अध्यवसीयेत इति प्रामाण्यमेवोत्सीदेत् अथार्थक्रियाज्ञानं स्वतः प्रमा
णमिति चेत् को विशेषः अव्यभिचार इति चेत् न स्वप्नावस्थायामसत्यप्युदकाहरणेऽर्थक्रियाविज्ञानदर्शनात् अर्थ
सुखज्ञानमेवार्थक्रिया तत्राव्यभिचार एव नहि क्वचिदप्यसति सुखे सुखज्ञानमस्ति सत्यमेतत् ननु तेन पूर्वज्ञानस्य
प्रामाण्यस्याध्यवसानं संभवति अप्रमाणेनापि प्रियासङ्गविज्ञानेन स्वप्नावस्थायां सुखदर्शनात् तस्मात्स्वतः
प्रामाण्यपक्षापूर्वम् अर्थान्यथात्वकारणदोषज्ञानाभ्यामपोद्यत इत्यवश्यमङ्गीकरणीयम् एवञ्च शब्देनापौ
रुषसंस्पर्शरहितत्वाद्दोषाणामपौरुषेये वेदे तदभावात् साक्षाच्चार्थान्यथात्वज्ञानाभावादनपोदितं प्रामाण्यं भ
वति पौरुषेयवचनानि तु पुरुषबुद्धिप्रभवत्वाद्भ्रान्त्या विप्रलिप्सया वा प्रयुक्तानि मूलदोषेण दुष्टत्वादयथार्थ
नि भवन्तीति विशेषमन्ये केचित्त्वाहुः न लौकिकशब्दस्यायथार्थत्वमस्ति तदभावात् नहि लौकिकशब्दः प्रमाणम
स्ति वक्त्रभिप्रायानुमापकत्वात्पुरुषवचनानाम् तेनानुमानस्यैवायं व्यभिचारो न शब्दस्य न वा तस्यापि
विवेकाग्रहाद्विलिङ्गस्वलिङ्गव्यवहारप्रवृत्तेः यदि तु शब्दस्यैवायं व्यभिचारोऽभ्युपेयते स्वाभाविकमेवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शा·दी·

३२

प्रामाण्यं स्यात्· नहि पुरुषदोषेण शब्दस्य दोषो भवति· यथावस्थितशब्दाभिव्यक्तिमात्रे पुरुषस्य व्यापारात्· तदिदमसा
रम्· यदि लोके शास्त्रे नास्ति तर्हि वेदे पि कथं स्यात्· न चाभिप्रायानुमानक्षीणशब्दस्यार्थप्रतिवाचकत्वे प्रमाणम
स्तीत्युक्तं न्यायरत्नमालायाम्· यदपि च व्यभिचाराभ्युपगमे स्वाभाविकमप्रामाण्यं भवति· पुरुषदोषस्य शब्दे न व
ताराद् इति· स्यादेतदेवम्· यदि यदीयं यद्वा क्वचन स पुरुषोभिव्यञ्ज्यात्· न तु तेनैव क्रियते· वर्णा नित्याः पदानि च·
वाक्यानि तु पुरुषैरेव क्रियन्ते· पौरुषेयत्वादेव यथावस्थितानि व्यज्यमानानि वेदवाक्यवदपौरुषेयाण्यर्थस्य
ततश्च वक्त्रभिप्रायानुमापकत्वमपि न स्यात्· तद्यथा· अर्थैरभिव्यज्यमानानि वेदवाक्यानि नाध्येतॄणामभि
प्रायं सूचयन्ति· तथा पुरुषवाक्यान्यपि न सूचयेयुः· यदि हि व्यभिचारशङ्कया लोके शब्दस्याप्रामाण्यं न सं
भवतीत्युच्यते· तर्हि तद्वक्त्रभिप्रायानुमानेपि तुल्यम्· अन्यथासंविदानस्यान्यथावाक्यरचनादर्शनात्· किं
च शब्दस्य चक्षुरादेरिव स्वसामर्थ्येन बोधकत्वाद्व्यभिचारेपि न बोधकत्वहानिः· लिङ्गस्याव्यभिचारिण ए
व गमकत्वमिति व्यभिचारिणो लिङ्गत्वमनुपपन्नम्· अपवक्तृणां तु व्यभिचारशङ्का निवत्यनुमानम्· तथा

राम:

३२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सति शाब्दमेवार्थप्रमाणमस्तु प्रतिबन्धिकाया आशङ्काया निरस्तत्वात् । अवश्यं हि बुद्धिविशेषमनुमिततां प्रथमं पदार्था
स्तेषां चान्वययोग्यता ज्ञातव्या । ते त्वालोच्यमाना प्रागेव वाक्यार्थमवबोधयन्तीति नानुमानं प्रतीक्षन्ते । किञ्चानुमितेबु
द्धिविशेषपश्चादनुवादभूतं वाक्यं वाक्यार्थमवबोधयन्तीति वः सिद्धान्तः । ततश्च यो नाम मानानाप्तस्वाप्तत्वमाग्रहीतस्तद्वा
क्यादयथार्थमेव ज्ञानमुत्पन्नमित्युपगन्तव्यम् । ततश्च दोषाधीनत्वादप्रामाण्यस्य वक्तृदोषाणां च शब्दे संक्रान्त्य
नभ्युपगमात्स्वारसिकमेव शब्दे दुष्टत्वमापन्नमिति बलादप्रामाण्यं वेदस्य प्रसज्यत इत्याशङ्कां नावकाशः तस्मादनाप्त
वचसां सत्येवाप्रामाण्ये वक्तृदोषाधीनत्वादेव च तदभावादप्रामाण्यमित्येव वक्तव्यम् । तस्माच्चोदनालक्षण एव धर्मः श्रे
यस्कर इत्यर्थः । यदेव श्रेयःसाधनरूपं यागहोमादि तदेव धर्म इत्युच्यते लोके । नापूर्वमनन्तं करणमित्यादि वा । लोकप्रसि
द्धिविरहात् । न च पूर्वमेव श्रेयःसाधनं । न भवान्तरव्यापारत्वात् । तस्माद्यागादिरेव श्रेयःसाधनरूपेण धर्मस्तद्रूपा
भावाच्च न श्येनादेस्तस्य धर्मतापत्तिः । चोदनालक्षणमात्रस्य धर्मत्वं मा भूदित्यर्थत्वेन विशेष्यते । चोदनाशब्दे
न च प्रवर्त्तकं निवर्त्तकं च वाक्यमुच्यते । ततश्च निषेधवाक्ये न हिंस्यादित्यादिभिरनर्थत्वेन लक्ष्यमाणानां हिंसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्या·दी· दीनामपि धर्मत्वं स्यात्तदाह स्वर्गयस्वार्थत्वेन पूर्वकर्तकवाक्येनोच्यते · तस्यैव धर्मत्वं च कुमर्थग्रहणम् · भाष्ये च रूपेणादि
१२ ग्रहणं तत्साध्या हिंसा लक्षणार्थम् · उपरिष्टाद्धिंसाहिंसा साच प्रतिसिद्धेति विवरणात् · केचित्तु · लक्षणाम्बाधिहरन्तः रूप
नादिस्वरूपमेवार्थशब्दव्यावर्त्यमन्यन्ते · तेषामेव नैव रूपेणाद्यः कर्तव्या विज्ञायन्ते · इति निषेधत्वनिराकरणेन प्रवृ
त्तिनिषेधविषयत्वसमर्थनात् · कथं पुनस्तेषां विधेयत्वं निराक्रियन्ते · तत्राहुः · यस्य हि विधिः सत्त्वसिद्धमन्यथानुपपत्त्या
नुष्ठानमाक्षिपति तद्विधेयमित्युच्यते · काम्येषु कर्मसु कामवशादेव प्रवृत्तिसिद्धेस्तत्र स्वविधिः सिद्धमन्यथानुपप
त्त्यभावान्न स्वयमनुष्ठानमाक्षिपति · ननु कर्तव्यतावोधनमेव प्रवर्तनम् · कर्तव्यता च वेदे यागस्य लिङैव बोधिते
ति कथमविधेयत्वम् · सत्यम् · ननु यागस्य कर्तव्यताभिनिष्पुभिधतिति याग स्वयागास्तु तस्य विषयः करणं च सोयं क
र्तव्यतात्मा नियोगान्यथानुपपत्त्या स्वविषयस्य कर्तव्यतां बोधयन्ननुष्ठापक इत्युच्यते · रूपेणादीनामनुरागादेवा
नुष्ठानसिद्धेर्न विधिस्तेषामनुष्ठानमाक्षिपतीति न तेषां विधेयत्वम् · तेषां निषेधविषयत्वादनर्थत्वमिति · तत्रेदं व
क्तव्यम् · कस्मिन्नंशे तेषां व्यावृत्तिरिति धर्मत्वइति चेन्न · तत्स्वरूपानभिधानात् · दृष्टं हि स्तनं वेदार्थस्य कार्यत्वप्रति राम:
३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मी॰ पु॰ श्रीगणेशायनमः॥ ॥यत्कृपालेशमात्रेण पुरुषार्थचतुष्टयम् ॥प्राप्यते तमहं वन्दे गोविन्दं भक्तवत्सल
१ म् ॥१॥अनन्तगुणसंपन्नमनन्तभजनप्रियम् ॥अनन्तरूपिणं वन्दे गुरुमानन्दरूपिणम् ॥२॥इह खलु परम
कारुणिकेन भगवता जैमिनिमुनिनाऽथातो धर्मजिज्ञासेत्यादिना द्वादशसु अध्यायेषु धर्मो विचारितः ।तत्र वेदेन
प्रयोजनमुद्दिश्य विधीयमानोर्थो धर्मः ।यथा यागादिः ।स हि यजेत स्वर्गकाम इत्यादिवाक्येन स्वर्गमुद्दिश्य विधीय
ते ।तथा हि ।यजेतेत्यत्र हि अस्त्यंशद्वयम् ।यजधातुः प्रत्ययश्च ।तत्र प्रत्ययेऽस्त्यंशद्वयम् ।आख्यातत्वं लिङ्त्वं च ।आख्या
तत्वं दशसु लकारेषु वेद्यते ।लिङ्त्वं पुनः केवलं लिङ्येव ।तत्राख्यातत्वलिङ्त्वाभ्यां भावनैवोच्यते ।भावना ना
म भवितुर्भवनानुकूलो भावकव्यापारविशेषः ।सा च द्विविधा ।शाब्दी भावना आर्थी भावना चेति ।तत्र पुरुषप्र राम: १

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यनुकूलो व्यापारविशेषः शाब्दीभावना। सा च लिङ्गांशेनैवोच्यते। लिङ्श्रवणेऽयं मां प्रवर्त्तयतीति मत्प्रवृत्त्यनुकू-
लव्यापारवानयमिति नियमेन प्रतीयमानत्वात्। यद्यस्मात्प्रतीयते तत्तस्य वाच्यम्। यथा गोशब्दस्य गोत्वम्। स च
प्रवृत्त्यनुकूलो व्यापारविशेषो लोके पुरुषनिष्ठोऽभिप्रायविशेषः। वेदे पुरुषाभावाल्लिङादिशब्दनिष्ठ एव। न
हि वेदः पुरुषनिर्मितः। वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्। वेदाध्ययनसामान्यादधुनाध्ययनं यथेत्यादिना वेदा-
पौरुषेयत्वस्य साधितत्वात्। यः कल्पः स कल्पपूर्व इति न्यायेन संसारस्यानादीश्वरस्य च सर्वज्ञत्वादीश्वरेणानक-
ल्पीयं वेदमस्मिन्कल्पे स्मृत्वोपदिशतीत्येतावतैवोपपन्नो प्रमाणान्तरेणार्थमुपलभ्य रचितत्वकल्पनानुपपत्ते-
श्च। ततश्च पुरुषाभावाच्छब्दनिष्ठैवासा। अत एव शब्दो भावनेति व्यपदिशन्ति। सा च शाब्दीभावनांशत्रयमपे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षन्ते साध्यं साधनमिति कर्त्तव्यतां चेति। तत्र साध्याकांक्षायां वक्ष्यमाणलक्षणांशत्रयोपेतार्थी भावना साध्यत्वे
न संबध्यते। एकप्रत्ययगम्यत्वेन समानाभिश्रुतेः। यद्यपि संख्यादीनामप्येकप्रत्ययगम्यत्वं समानं तथाप्ययो
ग्यत्वान्न तेषां भाव्यत्वेनान्वयः। करणाकांक्षायां लिङादिज्ञानं करणत्वेन संबध्यते। तस्य च करणत्वेन भावनो
पादकत्वेन सन्निकर्षस्येव रूपादिज्ञाने सन्निकर्षात्प्रागरूपज्ञानस्येव लिङादिज्ञानात्प्राक् शब्दधर्मभावना
याश्चभावप्रसङ्गात्। किन्तु भावनाभाव्यनिवर्त्तकत्वेन लिङादिज्ञानं हि शब्दभावनाभाव्यार्थभावनां निवर्त्तयति
दृवच्छेदनम्। अतो लिङादिज्ञानस्य करणत्वेनान्वयः। इतिकर्त्तव्यताकांक्षायां प्राशस्त्यज्ञानं इतिकर्त्तव्यतात्वे
न संबध्यते। तच्च प्राशस्त्यज्ञानं वायुर्वैक्षेपिष्ठा देवतेत्याद्यर्थवादैर्जन्यते। ते हि अर्थवादाः स्वार्थप्रतिपादनेप्रयोज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमत्वभमानाल्लक्षणायाकृतोः प्राशस्त्यंप्रतिपादयन्ति।स्वार्थमात्रपरत्वेआनर्थक्यप्रसङ्गात्।नचेष्टापत्तिः।अध्यय
नविध्युपात्तत्वेनानर्थक्यानुपपत्तेः।तथाहि।स्वाध्यायोध्येतव्यइत्यध्ययनविधिःसकलस्यवेदस्याध्ययनकर्त्त
व्यतांवोधयन्सर्वोवेदःप्रयोजनवदर्थपर्यवसायीतिसूचयति।निरर्थकस्याध्ययनानुपपत्तेश्च।सचवेदःविधि
मन्त्रनामधेयनिषेधार्थवादात्मकः।तत्रविधिःप्रयोजनवदर्थविधानेनार्थवान्।सचाप्राप्तमर्थंविधत्ते।य
थाग्निहोत्रंजुहुयात्स्वर्गकामइतिविधिरप्राप्तंप्रयोजनवद्धोमंविधत्तेअग्निहोत्रहोमेनस्वर्गंभावयेदिति।यत्रतु
कर्मप्रकारान्तरेणप्राप्तंतत्रतदुद्देशेनगुणमात्रंविधत्तेयथादध्नाजुहुयादित्यत्रहोमस्याग्निहोत्रंजुहुयादित्य
नेनप्राप्तत्वाद्धोमोद्देशेनदधिमात्रविधानंदध्नाहोमंभावयेदिति।यत्रतूभयमप्राप्तंतत्रविशिष्टंविधत्ते।तदु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मी· सा· कं। न चेदन्येन विशिष्टा इति। विशिष्टा उपदिष्टा इत्यर्थः। यथा सोमेन यजेतेत्यत्र सोमयागयोरप्राप्तत्वात् सोमविशिष्टस्य याग
३ विधानं सोमवता यागेनेष्टं भावयेदिति। न चोभयविधाने वाक्यभेदः। विशिष्टस्यैकत्वात्। विशिष्टविधौ च मत्वर्थ
लक्षणा। यथा सोमपदेन मत्वर्थो लक्ष्यते सोमवतेति। नहि मत्वर्थलक्षणां विना सोमस्यान्वयः सम्भवति। यदि ता
वत्सोमयागयोरेकरूपेण भावनायां करणत्वेनैवान्वयः सोमेन यागेनेष्टं भावयेदिति तत उभयविधाने वाक्यभेदः
सोमस्य यागवत्फलभावनाकरणत्वेन प्राधान्यापत्तिश्च यागार्थत्वानुपपत्तिश्च यागे द्रव्यानुपपत्तिश्च प्रत्ययवा
च्यफलभावनायाः समानपदोपात्तेन करणाकांक्षाया निवृत्तत्वेन भिन्नपदोपात्तस्य सोमस्य करणत्वेनान्व राम:
यानुपपत्तिश्च स्यात्। यदि च वैयधिकरण्येनान्वयः। तत्र न तावद्यागेन सोममित्यन्वयः समानपदोपात्तत्वात् ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्ययवाच्यफलभावनाकरणत्वेनान्वितस्य यागस्य सोमकर्मकभावनान्वयानुपपत्तेर्यागस्य सोमार्थत्वापातश्च। न चे
ष्टापत्तिः। अदृष्टकल्पापत्तेः। नहि यागस्य सोमार्थत्वे फलभावनायां सोमस्य करणत्वेनान्वयो वक्तव्यः। भावनाकर
णत्वं भावनाभाव्यनिवर्त्तकत्वेनेत्युक्तं। न च सोमो ऽदृष्टद्वारेण संभवति। व्रीहिषु अववातेनेव योगेन सोमे कस्यचिद्दृष्ट
स्याजननात्। अतस्तेन तावत्सोमे किञ्चिद्दृष्टं जननीयं प्रोक्षणेनेव व्रीहिषु। न था यागस्य सोमार्थत्वे ऽदृष्टमन्त्रेण फलं
जनयितुं समर्थः। गृहे जुहोतीति वाक्यविहितहोमेन तस्य भस्मीभावात्। अतो ऽदृष्टकल्पापातान्न यागस्य सोमार्थत्वमिति न यागे
न सोमं भावयेदित्यन्वयः सम्भवति। करणत्वेनोपस्थितस्य सोमस्य साध्यत्वेनान्वयानुपपत्तेश्च। अथ सोमेन यागं भावयेदि
त्यन्वयः। न च यद्यपि सोमस्य यागार्थत्वाधारणे निर्दिष्टमेव प्रयोजनं लभ्यते इति नादृष्टकल्पापत्तिर्नापि करणत्वेनोपस्थित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मी·सा· स्यसोमस्यसाध्यत्वानुपपत्तिःकरणत्वेनैवान्वयात्।तथाप्यप्राप्तत्वाद्भावनाकरणत्वेनान्वितस्ययागस्यसाध्यत्वेनान्व
४ यानुपपत्तिस्तत्वत्तथैवाननुपजेतेयत्रयागस्यनकरणत्वेननापिसाध्यत्वेनोपस्थितिः।तद्वाचकतृतीयाद्यभावा
त्।किन्तुभावनायांयागसंबन्धमात्रंप्रतीयतेयागस्यभावनासम्बन्धःकरणत्वेनसाध्यत्वेनचसंभवतितत्रकरण॰
त्वांशमादायफलसम्बन्धःसाध्यत्वांशमादायगुणसम्बन्धश्चस्यादितिचेत्।मैवम्।यद्यपिभावनायांयागस्यसंब
न्धमात्रंप्रतीयतेतथापिकरणत्वेनोपस्थितिदशायांनसाध्यत्वेनोपस्थितिःसम्भवतिविरोधात्तद्वत्त्वंयागेनस्व
र्गंभावयेदितिकरणत्वेनान्वयेसतिपश्चात्सोमेनयागंभावयेदितिसाध्यत्वेनान्वयोवक्तव्यस्तत्रश्चवाक्यभेदः।नचप्रत्यय॰ राम:
याविहितभावनास्वरूपेयागस्वरूपमात्रेमन्वेनीतियुक्तंवक्तुम्।कारकाणामेवक्रियान्वयात्।नास्तिद्धंसोमस्यनसा॰ ४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्रीगणेशायनमः॥ ॥हरिः ॐ॥वागीशाद्याःसुमनसःसर्वार्थानामुपक्रमे॥यन्नत्वाकृतकृत्याःस्युस्तन्नमामिगजाननम्॥१॥
युक्तिंमानवतींविदन्नुस्थिरव्रतिर्भेदैविज्ञोयार्थभागाप्रोहःक्रमकृत्स्नयुक्तिनिपुणःस्वाध्यायनिर्देशोन्नतिः॥नित्यस्फूर्त्यधिकार
वान्गतसदावाधःस्वतन्त्रेश्वरोजागर्तिश्रुतिमन्त्रसङ्ग्रोरतःश्रीबुक्कक्ष्मापतिः॥२॥यद्दृक्तप्रतिपाद्यनेपुणतःयत्नस्यस्व
मूर्त्तिंप्रथांतत्रायंस्थितिमूर्त्तिमाकलयतिश्रीबुक्कक्ष्मापतिः॥विद्यातीर्थमुनिस्सदात्मनिरतःसन्मूर्तिस्त्वनुयाहिकान्तेनास्य
स्वगुरोररवण्डितपदंसर्वैस्समुद्योतते॥३॥इन्द्रस्याङ्गिरसोनलस्यसुमतिःशैव्यस्यमेधातिथिर्धौम्योधर्मसुतस्यवैन्यनृपतेः
स्वौजानिमेगौतमिः॥प्रत्यग्दृष्टिरतःस्वनीसहचरोरामस्यपुण्यात्मनोयद्वत्तस्यविभोरभूत्कुलगुरुर्मन्त्रीतथामाधवः
॥४॥सरवलुप्राज्ञजीवातुःसर्वज्ञस्त्वविशारदः॥अकरोज्जैमिनिनयेन्यायमालांगरीयसीम्॥५॥तांप्रशस्यसभा
मध्येवीरबुक्कराभूपतिः॥कुरुविस्तरमस्यास्त्वमितिमाधवमादिशत्॥६॥सभव्यांभारतीतीर्थयतीन्द्रचतुराननात्॥कृ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पामव्याहतां लब्ध्वापराङ्गप्रतिमो भवत् ॥७॥ निर्मीय माधवाचार्यो विद्वदानन्ददायिनीम् ॥ जैमिनीयन्यायमालां व्याचष्टे बा
लबुद्धये ॥८॥ श्रुतिस्मृतिसदाचारपालको माधवो बुधः ॥ स्मार्तं व्याख्याय सर्वार्थं द्विजार्थं श्रौत उद्यतः ॥९॥ प्रणम्य पर
मात्मानं श्रीविद्यातीर्थरूपिणम् ॥ जैमिनीयन्यायमालां श्लोकैः संगृह्यते स्फुटम् ॥१०॥ एको विषयसन्देहपूर्व
पक्षावभासकः ॥ श्लोकोऽपरस्तु सिद्धान्तवादी प्रायेण कथ्यते ॥११॥ सर्वथापि सहस्रे द्वे नातिकामति संग्रहः ॥ मीमां
सासागरस्तेन क्रीडापुष्करिणीकृता ॥१२॥ शास्त्रेऽध्याये तथा पादे न्यायसंगतयस्त्रिधा ॥ शास्त्रादिविषये ज्ञाते तत्तत्सं
गतिरूह्यताम् ॥१३॥ धर्मो द्वादशलक्षण्या व्युत्पाद्यस्तत्र लक्षणैः ॥ प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकाः ॥१४॥
अधिकारोऽतिदेशश्च सामान्येन विशेषतः ॥ ऊहो बाधश्च तन्त्रं च प्रसङ्गश्चोदिताः क्रमात् ॥१५॥ विध्यर्थवादस्मृतयो
नाम चेति चतुर्विधम् ॥ प्रथमाध्यायगैः पादैश्चतुर्भिर्मानमीरितम् ॥१६॥ उपोद्घातः कर्मभेदमानं तस्यापवादगः
॥ प्रयोगभेद इत्येते द्वितीयाध्यायपादगाः ॥१७॥ श्रुतिलिङ्गवाक्यादिविरोधप्रतिपत्तयः ॥ अनारभ्योक्ति व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्यर्थस्त्वाम्यर्थो अष्टपादगाः ॥१८॥ प्रधानस्य प्रयोक्तृत्वमप्रधानप्रयोक्तृता ॥ फलचिन्ताजघन्याङ्गचिन्ते त्वेते चतुर्थगाः ॥१९
॥ श्रुत्यादिभिः क्रमस्तस्य विशेषो वृद्ध्यवर्द्धने ॥ श्रुत्यादेर्बलिता चेति पञ्चमाध्यायपादगाः ॥२०॥ अधिकारी तस्य धर्माः प्रति
निध्यर्थलोपने ॥ दीक्षासत्रदेयवह्न्यत्र षष्ठपादेष्वमी स्थिताः ॥२१॥ प्रत्यक्षोक्तातिदेशोऽस्य शेषः सामनिरूपणात् ॥ ना
मलिङ्गातिदेशौ द्वौ सप्तमाध्यायपादगाः ॥२२॥ स्पष्टलिङ्गाद्यथा स्पष्टात्प्रबलादपवादतः ॥ अतिदेशविशेषाः स्युर
ष्टमाध्यायपादगाः ॥२३॥ ऊहारंभोऽथ सामोहो मन्त्रोहस्तत्प्रसङ्गतः ॥ नवमाध्यायपादेषु चतुर्ष्वेते प्रकीर्तिताः ॥२४॥ द्वारलो
पोऽस्य विस्तारः कार्यैकत्वसमुच्चयः ॥ ग्रहसामप्रकीर्णानि नञर्थश्चाष्टपादगाः ॥२५॥ उपोद्घातस्तथा तन्त्रावापौ त
न्त्रस्य विस्तृतिः ॥ आवापविस्तृतिश्चैवैकादशाध्यायपादगाः ॥२६॥ प्रसङ्गस्तन्त्रिनिर्णीतिः समुच्चयविकल्पने ॥ द्वादशा
ध्यायपादार्था इति पादार्थसङ्ग्रहः ॥२७॥ उपोद्घातापवादाभ्यां प्रसङ्गानुप्रसङ्गतः ॥ तत्तत्पादगतत्वेन विचारान्तरमुच्य
ते तु ॥२८॥ तन्त्रे पूर्वोत्तरीभावो ध्यायानामभिधास्यते ॥ पादानान्तु तमत्वे यत्नेशाच्छ्रुत्या दर्शयामहे ॥२९॥ विधिःसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षान्मितिधर्मेतस्यनोऽर्थवादगीः ॥ वेदमूलास्मृतिर्नामवाक्यांशोमीख्वतःक्रमः ॥३०॥ ऊहित्वासङ्गतीस्तिस्रस्तथावान्तरस
ङ्गतिम् ॥ ऊहेदाक्षेपदृष्टान्तप्रत्युदाहरणादिकाम् ॥३१॥ पूर्वन्यायस्यसिद्धान्तयुक्तिंवीक्ष्यपरेनये ॥ पूर्वपक्षोक्तयुक्तिंच
तत्राक्षेपादियोजयेत् ॥३२॥ ॥स्वाध्यायोऽध्येतव्यइत्यस्यविधानस्यप्रयुक्तितः ॥ विचारशास्त्रनारभ्यमारभ्यंवेतिसंश
यः ॥३३॥ अर्थधीहेतुताधीतेलोकसिद्धावघातवत् ॥ नियामकंचनैवातोवेधारंभोनसंभवी ॥३४॥ दृष्टापूर्ववदस्य
नकत्वपूर्वंनियामकम् ॥ अर्थनिर्णायकंशास्त्रमतआरभ्यतांविधेः ॥३५॥ अथवाध्यापनात्सिद्धेनैवास्त्यध्ययनेवि
धिः ॥ तेनपूर्वोत्तरौपक्षौप्रसाध्यावन्यहेतुभिः ॥ विधेयाध्यापनंसिद्ध्येद्वानस्यार्थधियंविना ॥ तेननिर्विषयंशास्त्रं
निष्फलंचेत्युपेक्ष्यताम् ॥ स्वतःप्राप्तार्थबोधस्यविवक्षानपनोदनात् ॥ विषयादिषुसंपाद्यंशास्त्रमारभ्यतांततः ॥८
३८॥ ॥विचारविषयोधर्मोलक्षणेनाविवर्जितः ॥ मानेनचाथवोपेतस्तत्राप्यामितिविचिन्त्यते ॥३९॥ लौकिकाका
रहीनस्यतस्यकिंनामलक्षणम् ॥ मानंत्वांकातुदूरेचप्रत्यक्षाद्यप्रवर्तनात् ॥ चोदनागम्यआकारोऽह्यर्थत्वेसति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·मा·
३

त्वक्षणाम्॥अत एव प्रमाणं च चोदनैवात्र नो कुतः॥४१॥ ॥यद्वा जिज्ञास्यवेदार्थः किं मन्त्राद्यवबोधितः॥सिद्धार्थोप्यथ
विध्येकगम्यः कार्यार्थ एव वा॥४२॥सिद्धेपि पुत्रजन्मादौ व्युत्पत्तिरुपपादिता॥मन्त्रादिगम्यसिद्धस्य वेदार्थत्वेपि का
क्षतिः॥४३॥हर्षहेतुत्वहेतुत्वेन व्युत्पत्तिः पुत्रजन्मनि॥दुर्लभसुलभाकार्ये वेदार्थोतः स एव हि॥४४॥ ॥धर्मस्य
ज्ञापकं मानं यदुक्तं चोदनात्मकम्॥एतत्किं न परीक्ष्यं स्यात् किं वा सम्यक् परीक्षताम्॥४५॥मानोपदेशान्मेय
स्य सिद्धत्वात्किं परीक्षया॥नैव विचारशास्त्रस्येस्मिन् परीक्षोपेक्षते कुतः॥४६॥ ॥आदौ परीक्ष्यो वेदार्थश्चो
दनामानताथवा॥वेदार्थस्य प्रधानत्वात्प्रथमं तत्परीक्षणम्॥४७॥चोदनामानतैवात्र प्रथमं साध्यतां गता॥
अनपेक्षतया तस्य यतो मुख्यत्वमाश्रितम्॥४८॥प्रत्यक्षादिभिरप्येष गम्यते विधिनैव वा॥अक्षादीनां प्रमा
णत्वान्मेयधर्मावभासिता॥४९॥वर्तमानैकविषयमक्षं धर्मस्तु भाव्यसौ॥अक्षमूलोनुमानादिस्तेन विध्येक
मेयता॥५०॥अबोधको बोधको वा ननावद्बोधको विधिः॥राध्येरलौकिके धर्मे ग्रहणं दुर्घटं यतः॥५१॥सम्यग्भ

श्रीः
३

अगृहीते धर्मे शक्तिग्रहणासंभवात् ॥ बोधकस्य विधेर्मानमनपेक्षतया स्थितम् ॥५२॥ विध्यादिरूपो यः शब्दः सो नित्योऽथा
विनश्वरः ॥ अनित्यो वर्णरूपत्वाद्धटोज्जन्मोपलंभनात् ॥५३॥ अबाधितप्रत्यभिज्ञाबलाद्वर्णस्य नित्यता ॥ उच्चा
रणप्रयत्नेन व्यज्यते सो न जन्यते ॥५४॥ वेदवाक्यसमानस्यान्मानं वा नास्य मानता ॥ पृथक्सङ्केतवीक्षाया म
नपेक्षत्ववर्जनात् ॥५५॥ वेदेऽपि लोकवन्नैव वाक्यार्थे संगतिः पृथक् ॥ गृहीतव्यात्ततो वाक्यं प्रमाणं नैरपेक्षतः ॥९
पौरुषेयं न वा वेदवाक्यं स्यात् पौरुषेयता ॥ काठकादिसमाख्यानाद्वाक्यत्वाच्चान्यवाक्यवत् ॥५७॥ समाख्याध्या
पकत्वेन वाक्यत्वं तु पराहतम् ॥ तत्कर्त्रनुपलंभेन स्यात्ततोऽपौरुषेयता ॥ ॥इति प्रथमे प्रथमः॥ ॥वायुर्वैत्येवमा
देरर्थवादस्य मानता ॥ न विधेयोऽस्ति धर्मे किं किं वा सो तत्र विद्यते ॥५९॥ विध्यर्थवादशब्दानां मिथोऽपेक्षापरीक्षया न
नास्त्येकवाक्यता धर्मे प्रामाण्यं संभवेत्कुतः ॥६०॥ विध्यर्थवादौ साकांक्षौ प्राशस्त्यपुरुषार्थयोः ॥ तेनैकवाक्यतातः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ·मा·
४

स्माद्धृद्धानां धर्ममानता ॥६१॥ ॥वादोऽर्थहेत्वपेक्षत्वान्न विधेर्मानतेति चेत् ॥ सत्यन्वये स्तुतिद्वारा नापेक्षेति गुरुर्ज
गौ ॥६२॥ ऊर्जोऽवरुध्या इत्येष विधिवन्निगदो न किम् ॥ यूपो दुम्बरतां स्तौतीति स्तौति वा तद्विधित्सया ॥६३॥ चतुर्थ्याः फल
नोत्वाभा यूपो दुम्बरताफलम् ॥ ऊर्जोऽवरोधं कथयन् कथं स्तुतिपरो भवेत् ॥६४॥ अऔदुम्बरत्वस्याविधानात्कस्य तत्
फलम् ॥ अर्थद्वैधे वाक्यभेदस्तेन स्तावकरूपवस्तुः ॥६५॥ ॥आप्नोतीति विधित्वस्य वादत्वस्याप्यनिर्णयात् ॥ नप्र
माचोदनेत्येतन्न वादो ह्येकवाक्यतः ॥६६॥ तेनेह न्नीमितिप्रोक्तो वादो हेतुरतस्स्तुतिः ॥ हेना श्रुताहेतुता नः भूर्याध
न्नधसाधनम् ॥६७॥ भूर्पसाधनताश्रोतीनाश्रोतेः सा विकल्प्यते ॥ अतो निरर्थको हेतुस्स्तुतिस्तस्मात्स्ववर्तिका ॥६
८॥ मन्त्रा उरु प्रथस्वेति किमदृष्टैकहेतवः ॥ यागे सूतपुरोडाशप्रथनादेश्च भासकाः ॥६९॥ ब्राह्मणेनाप्रतद्धा
नान्मन्त्राः पुरोपकहेतवः ॥ न तद्धानस्य दृष्टत्वाद्दृष्टं वरमदृष्टतः ॥७०॥ ॥मन्त्रवाक्ष्णराणायोर्यद्धाकल्लहो वि श्रीः
४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नियोजने ॥ नमन्त्रासिद्धः सिद्धार्थमनुवक्तीतरद्यतः ॥ ॥ इति प्रथमे द्वितीयः ॥ ॥ अष्टकादिस्मृतेर्दृष्टेर्नमात्वं मानताथ
वा ॥ निर्मूलत्वान्नमा नं सा वेदार्थोक्तो निरर्थता ॥७२॥ वैदिकैः स्मर्यमाणत्वात्संभाव्या वेदमूलता ॥ विप्रकीर्णार्थसंक्षे
पात्सार्थत्वात्सार्थत्वादस्ति मानता ॥७३॥ ॥ नमास्मार्तोऽष्टकाकृत्वाधांजनाद्यतिमन्त्रणीः ॥ तन्नस्मृतेर्मूलवेदेऽनुमि
तेमात्वसंभवात् ॥७४॥ औदुम्बरी वेष्टनीया सर्वेत्येषा स्मृतिर्मितिः ॥ आमितिर्वेतिसन्देहे मितिः स्यादष्टकादिव
त् ॥७५॥ औदुम्बरीं स्पृष्ट्वा न गायेदिति प्रत्यक्षवेदतः ॥ विरोधान्मूलवेदस्यानुमानान्नमानता ॥७६॥ ॥ प्रत्यक्षा
नुमितश्रुत्योर्याद्व्याघातदर्शनात् ॥ अमात्वे शंकिते वाधो नैनुमानस्याश्रवणयिते ॥७७॥ परप्रत्यक्षवेदोऽत्रमूलं वेष्टे
ष्टनस्य तत् ॥ अस्त्वेवमप्यनुष्ठानं स्वप्रत्यक्षानुरोधतः ॥७८॥ वैसर्जनाख्यहोमीयवासो ग्रहणसत्स्मृतिः ॥ प्रमानं
वा श्रुत्यबाधात्प्रमा स्यादष्टकादिवत् ॥७९॥ दृष्टलोभैकमूलत्वसंभवे श्रुत्यकल्पनात् ॥ सर्ववेष्टनवद्बाधहीना
प्येषा न हि प्रमा ॥८०॥ ॥ आचान्तेनेत्यमामावास्मृतिरेषा नमा भवेत् ॥ वेदं कृत्वेति यः श्रौतः क्रमस्तेनविरोध

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ.मा. तः॥८१॥आचान्त्यादिःपदार्थोऽत्रक्रमोधर्मःपदार्थगः॥धर्मस्यधर्म्यपेक्षत्वादवाधादस्तिमानता॥८२॥ ॥शाक्योक्ता
५ हिंसनंधर्मोनवाधर्मःश्रुतत्वतः॥नधर्मोनहिपूतंस्याद्गोक्षीरंश्वदृतौधृतम्॥८३॥सदाचारोप्रमामावानिर्मूलत्वाद
मानता॥अष्टकादेरिवैतस्यसमूलत्वात्प्रमाणता॥८४॥यवादिशब्दाःकिंअर्थानोवार्येम्लेच्छसाम्यतः॥दीर्घशूक
प्रियङ्ग्वाद्यद्येष्वप्यर्थाविकल्पिताः॥८५॥यत्रान्याइतिशास्त्रस्यप्रसिद्धिस्तुबलीयसी॥शास्त्रीयधर्मतेनात्रप्रि
यङ्ग्वादिर्नगृह्यते॥ ॥यवाद्यर्थानिर्णयेनन्तद्वाक्यंनप्रमेतिचेत्॥शास्त्रस्यबलित्वेनतत्प्रसिद्धार्थनिर्णयात्॥ ॥
योमातुलविवाहादौशिष्टाचारःप्रमानवा॥इतराचारवन्मात्वमभात्वंस्मार्तबाधनात्॥८८॥स्मृतिमूलोहिसर्व
त्रशिष्टाचारस्ततोऽत्रवा॥अनुमेयास्मृतिःस्मृत्यावाध्याप्रत्यक्षयानुसा॥८९॥लौकिकोवाक्यगोवार्थस्त्विष्टदादेः
समत्वतः॥उभौविध्यर्थवादैकवाक्यत्वादस्तिहान्तिमः॥९०॥कल्प्यःपिकादिशब्दार्थोग्राह्योवाम्लेच्छरूढि श्रीः
तः॥कल्प्याह्यार्येष्वसिद्धत्वादनार्यागमनादरात्॥९१॥ग्राह्यम्लेच्छप्रसिद्धिस्तुविरोधादर्शनेसति॥पिकनेमादि ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दानांकोकिलानांवर्थतानत:॥८२॥ ॥अर्थावोधादप्रमाणापिकालंभनचोदना॥मेवंम्लेच्छप्रसिद्धापितद्वोधादवि
रुद्धता॥९३॥अपौरुषेया:कल्याद्या:कृत्रिमावानदृष्टिमा:॥श्रुतिस्मृत्योर्धर्मबुद्धे:स्वतोमानंयत:समम्॥९४॥
पुन्नामोक्तेःपौरुषेयाःकाठकाद्यसमत्वत:॥तत्रोपदेशभिरेकेचिद्रापरत्तवादिकर्त्तताम्॥९५॥ ॥कल्प्येसर्वैतिथो
दन्त्रीकार्यंतोक्तेश्रुतिर्नमा॥नकल्प्येसाध्यवेदत्वप्रहाणाद्दुर्बलत्वत:॥९६॥होलाकादेर्व्यवस्थास्यात्साधारण्य
मुपाश्रित:॥देशभेदेनदृष्टत्वात्साम्यंमूलत्वसमत्वत:॥९७॥ ॥प्राच्यादिपदयुक्तायाःश्रुतेरनुमितोपदे॥अ
र्थावोधादप्रमात्वंचेन्नसास्यानुमानत:॥९८॥गोगाव्यादिषुसाधुत्वेप्रयोगेवानकश्चन॥नियमोत्रास्तिवाना(
स्तिव्योकृतेर्मूलवर्जनात्॥९९॥साधूनेवप्रयुञ्जीतगवाद्यास्त्वसाधव:॥इत्यस्तिनियम:पूर्वपूर्वव्याकृति(
मूलत:॥१००॥ ॥अश्वालम्भनशब्दस्यदन्त्यतालव्यसंशयात्॥अभावेदन्त्यनिर्णीतिराप्तोक्तव्याकृते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ.मा.
६

वित्वात् ॥१॥ लोके पदपदार्थौ योनतौ वेदेऽथवान्यतौ ॥ रूपभेदात्पदं भिन्नमुतानादिभिदास्फुटा ॥२॥ वैदिकत्वा
त्पदैकत्वं काश्चित्कोरूपभिन्नता ॥ प्रापिकेणपदैक्ये न तदर्थैक्यं तथाविधम् ॥३॥ व्यक्तिर्व्रीह्यादिशब्दार्थ आकृ
तिर्वा क्रियान्वयात् ॥ व्यक्तिर्व्युत्पत्तिवेलायामाकृत्या सोपलक्ष्यते ॥४॥ शक्तिग्रहादियुक्तिभ्य आकृतेरर्थ
तोचिता ॥ क्रियापर्यवसानाय व्यक्तिस्तत्रोपलक्ष्यताम् ॥५॥ ॥ गवादिचोदनानामाजातिव्यक्त्योरनिर्णया
त् ॥ आनन्त्यव्यभिचाराभ्यां न व्यक्तिरिति निर्णयः ॥६॥ ॥ इति प्रथमे तृतीयः ॥ ॥ उद्भिदादिपदं धर्मे किम
मानमुत प्रमा ॥ विध्यर्थवादमन्त्रेष्वनन्तर्भावतो नमा ॥७॥ अन्तर्भावो विधावुद्भिदा यजेतेति दृश्यते ॥ नाम
नामत्वेनान्वयो वाक्ये वक्ष्यते ततः प्रमैव तत् ॥८॥ गुणोऽयं नामधेयं वा खनित्रैस्य निरुक्तितः ॥ ज्योतिष्टोमं समा
श्रित्य पश्वर्थगुणचोदना ॥९॥ फलोद्भिदा समानेया निरुक्तिर्योगनाम्न्यपि ॥ नामत्वमर्थ्यागसामानाधि श्री
६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नैषधीव्या २८७५

४२५८

श्री ५ को सरकार

...University, Balmeeki Campus, ...

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीगणाधिपतये नमः ॥ ॥यत्कीर्तिप्रभया सुशुक्लनकुवर्णैर्ज्ञापापम्रःवैः प्रभोर्नीलादेर्गनिनाप्रतीतिरचलाधीशः स्व
लौ·सं· स्वताशोभते ॥ यच्छिष्योऽगणैः समेगुरुरहो हार्दान्धकारापहः श्रीमद्रामदयालुरिंदुरमलो मोदाय भूयात्सदा
१ ॥१॥ नत्वा शंभुं हरिं गौरीं विघ्नेशं चैव भारतीं ॥ क्रियते रघुनाथेन लौकिकन्यायसंग्रहः ॥२॥ लौकिकन्यायरत्ना
नामाकरेभ्यस्समुद्धर्तितं ॥ तस्य संक्षेप एवेदं श्रीप्रबोधाय दर्श्यते ॥३॥ न्यायार्थविषयं चैवोदाहितं च यथामति ॥ व
दिष्यामोऽत्र संक्षेपादित्तदपि विवक्षितं ॥४॥ प्रसंगादागतानां तु न्यायानां तत्र विस्तृतैः ॥ अर्थमात्रं वदिष्यामः क
चिदन्यामुदाहृतिं ॥५॥ प्रसंगादागता ता अपि विनिगदिष्याताविषया न तेष्वाख्यास्यं ते पुनरसकृत्तु च्चविरलाः ॥ बु
नर्थाख्यास्वं ते विषयकथनादिप्रवितताः पुरोप्रोक्तान् कांश्चित्सुरैर्नपि वदिष्यामि विषये ॥६॥ अर्थादर्थोनशब्दार्थ
स्याग्रहणकृतः ॥ पूर्वैर्न्यायितयामोक्तावदिष्यामस्तनत्तथा ॥७॥ उदाहृतिं वदिष्यामः प्रायो वेदांतशास्त्रगां ॥ मी
मांसान्यायगां क्वापि क्वचित्तु परशास्त्रगां ॥८॥ आम्नायशिरसामस्यानिबंधत्वं न तादृशं ॥ स्याद्विशेष्यानुतवाद
धृतिश्वायसमाश्रयात ॥९॥ पंचीकृतस्यभूम्यादेः पृथिवीत्वादिकं यथा ॥ आम्नायान्तनिबंधत्वं तथास्यस्यादृसं
गार्थं ॥१०॥ अन्नाधारणधर्मस्यगंधवत्त्वादिकस्यवै ॥ उपलंभान्तथात्वं चेतन्नैवानाविवारितं ॥११॥ शास्त्रेकदेशात्संबं रामः
धं न्यायानां कार्यान्तरेष्वितं ॥ सतिलक्षणलंबधोवधिषुत्तत्र यतोऽकृतं ॥१२॥ उपालना:क्रियारूपाः शुद्धतेषु तथा ॥ कर ॥ १
९ रुपंते हितयाक्षेवां वेदांतत्वयथाकृतं ॥१३॥ यथाचान्यासिंबंधेषु कुक्षपण्यन्यगोचरः ॥ विवासो ह्यपतेन ह्लव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वमापि न क्षतिः ॥१४॥ स सैन्धवेदिभिर्जैर्हि सुपेर्मोहतत्त्ववद्ध्रुवं ॥ श्रुत्वं ततस्त्वमिदं धर्मनिबंधस्याप्यकाम्यतां ॥१५॥ तत्तद्दीर्घ
रन्तूतं धौरिदं स्यादनुबंधयतत् ॥ तदीयाः केनुबंधाः स्युरिति चेत्तत्समवोदितान् ॥१६॥ स्याद्वेदोपनिषन्नामधेयं दर्शकांकुरु
जरः ॥ वेदांतस्तदनुग्राहि सूत्रभाष्यादिकं तथा ॥१७॥ अधिकारी सविषयः संबंधः सप्रयोजनः ॥ अनुबंधा इति ख्यो
ताश्चत्वारः संति शास्त्रगाः ॥१८॥ अधीतवेदवेदांगो ह्यापातज्ञानबोधवान् ॥ बहुजन्मार्जितैः पुण्यैः सम्यगातधितेश्व
रः ॥१९॥ ब्रह्मास्मिसमनित्यं तु जगदेवं विवेचकः ॥ ऐहिकामुष्मिकेभ्यश्च भोगेभ्यो विरतः सदा ॥२०॥ यत्नेन मनसो
नित्यं विषयेभ्यो निवर्त्तकः ॥ तेभ्यो बाह्येन्द्रियाणां च बलादाकर्षकः सदा ॥२१॥ ऽस्मयेषां निर्हृतानां तथा स्थापनय
त्नवान् ॥ शीतोष्णसुखदुःखानां तथा मानापमानयोः ॥२२॥ दृढविश्वासवान्धीरः सत्यवादी दयान्वितः ॥ स हि श्रु-
श्रवणादेश्च सर्वदैव समाहितः ॥२३॥ गुरुवेदांतवाक्येषु केवलाद्वैतवृत्तिषु ॥ अहं बद्धो विमुक्तः स्यां कथमेवं विचिंत
कः ॥२४॥ वेदांतेष्वधिकारी स्यादेतादृशो विनिश्चितः ॥ तद्विषयस्तु जीवस्यात्यंताभेदः परात्मना ॥२५॥ तत्रैव तत्स्यता
त्पर्यं नान्यत्रैवापि निश्चितः ॥ सहैव विषयस्तस्य न्यायविद्भिर्विनिश्चितः ॥२६॥ यत्स्वार्थः शब्द इत्यादेर्याथार्थव्यवस्थितिः
गंगायां घोष इत्यादिलोकिकेष्वपि दृश्यते ॥२७॥ प्रयोजनवति श्रुत्यास्तात्पर्यं च विनिश्चितं ॥ वेदाभ्यासस्य विधेर्नू
नं विरोधो ह्यन्यथा भवेत् ॥२८॥ तच्च प्रयोजनं ब्रह्माद्वैतज्ञानेन सिद्ध्यति ॥ प्रपंचविद्रवतिब्रह्मन्त्यादिशास्त्रानुशा
सनात् ॥२९॥ न भेदेन स्वतास्पर्यं लिंधवत्वादन्यमानतः ॥ प्रयोजनविहीनत्वान्निंदितत्वाच्च सर्वथा ॥३०॥ मृत्योः स
स मृत्युमाप्नोति य इह नानेव पश्यति ॥ अल्पमप्यंतरं कुर्वन्विभेतीति श्रुतेर्भुतं ॥३१॥ कर्माभावाद्धोनमात्स्य यैः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूतेः किं त्वंतरात्मनि ॥ उपक्रमोपसंहारमुखैर्लिंगैर्विनिश्चयात् ॥ ३२ ॥ प्रमाणांतरनिरासेन ह्येतदर्थप्रपंचनं ॥ अविज्ञा
लो॰सं॰ तेन देहस्य विज्ञाशु परस्परं ॥ ३३ ॥ प्रतिपाद्यस्य चैकस्य जीवात्मपरमात्मनोः ॥ ऐक्यं ज्ञानां च संबंधो बोध्यबोधकता
२ स्थितः ॥ ३४ ॥ तेषामेकत्वबोधेनेत्स्याद्घात्यादकतात्तथा ॥ प्रयोजकप्रयोज्यत्वं संबंधः शास्त्रमोक्षयोः ॥
३५ ॥ हेतुमद्धेतुभावश्च संबंधो मोक्षबोधयोः ॥ संबंधोभिहितोस्मिंस्तेरूक्तो भेदस्य तु विधः ॥ ३६ ॥ अद्वैता
वरकस्यात्वम् ... ज्ञानस्य बाधनं ॥ सविलासस्य लेशापि ... नंदस्य प्रयोजनं ॥ ३७ ॥ कल्पितस्य निवृत्ति
श्च नाधिष्ठानातिरेकिणी ॥ रज्जुसर्पनिवृत्तिर्हि न रज्ज्वा अतिरिच्यते ॥ ३८ ॥ प्राप्तगात्मतया तस्य प्राप्तत्वं विद्व
सर्वदा ॥ कंठचामीकरस्याथ यात्त्वाप्तिरूपवर्ण्यते ॥ ३९ ॥ ब्रह्मैव सन्नयं ब्रह्माप्नोतीति श्रुतौ श्रुतं ॥ विमुच्य
ते विमुक्तस्तु निवृत्तश्च निवर्तते ॥ ४० ॥ अथ केवेन्मथुर्विदेत किमर्थं प्रजेत ॥ इष्टस्यार्थस्य लब्धा को कोविदा पर्वत
न्यत्नमाचरेत ॥ ४१ ॥ इति स्पष्टमाश्रित्य दुःखरूपः कृत यः ॥ पाप्ताः सम्यग्गुनिरस्तोः सुः श्रुतिस्थापयसमाश्रया
त ॥ ४२ ॥ अनादिविद्यया तस्याः प्रतेः सोप्राप्तवदद्वैत ॥ विद्ययातन्निवृत्तौ तु प्राप्त इत्युपवर्ण्यते ॥ ४३ ॥ वासिष्ठ
मातिरेकेणामसताकल्पितस्य वै ॥ विद्ययातन्निवृत्तिस्तु च चापदिशिनिश्चितु ॥ ४४ ॥ सवाहोकत्वकृता न स्पष्ट
जंगस्य निवर्तनं ॥ नृ दृष्टं व सुतो लोके दंगाद्येर्वाद्यसर्पवत ॥ ४५ ॥ अतश्च विधिद्वेषविस्यादेकत्वंप्रयोजनं ॥ आ ग॰म॰
त्मस्वरूपेणलं स्यान्नतत्संसिद्धप्रयोजनं ॥ ४६ ॥ नक्षेपार्णानुबधादिर्ष्योनाःप्राक्तोय्यथामति ॥ तदनुज्ञाहिसूत्रा २
देसलएवेवं विनिश्चितु ॥ ४७ ॥ तथा तस्य निर्बंधा नाम अनुबंधात्तत एव य ॥ अस्यापेत्तन्निर्बंधत्वादनुबंधाम वर्णिते ४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न हेतु

अत्र सर्वत्र निबंधनपदं प्रकरणपरं । उक्तिविदं सूत्रादेश्रुत्यनुग्राहित्वं तदर्थावबोधकत्वं इति चेन्न तत्र एव तत्संबं
धेन तदेव यथात् अन्यथाविषयासिद्धेर्विचारानुपपत्तेः सोऽस्य स्मृत्युक्तं वस्तु तत्तुल्येऽपि तद्विषयत्वेन संभवति । श्री
वत्सलेऽन्यस्य तद्विषयत्वादितद्धर्मकत्वयोश्च तयोस्तद्योगादिति । अन्ये तु यद्यपि वेदांतेष्वेव तदर्थप्रमाना
यतेत तथापि तेषां परपरिकल्पितार्थान्तरपरत्वसंशयात् संभावनादिपुरुषदोषप्रतिबंधवशाच्च प्रमाणामध्या
मननोर्ग ज्ञायमानाधिलानाक्षिप्ता निवर्तनक्षमा । किंतु मननन्यायेना प्रतिष्ठितेव भवति । अतस्तादृशप्रतिबंधनिरासेन
मा स्वोत्पन्नप्रमितेः स्वविषयप्रतिष्ठत्वसिद्धिः करणीय विचारशास्त्रमारंभणीयं । ननु विरुद्धधर्माक्रांतत्वानी
यत्रल्लोकैक्यासंभव इति । तन्न विरोधस्य मेहाधीनत्वात् तदसिद्धावसिद्धः । देहत्वादिनं प्रतिस्वरूपासिद्धेः अ
नुमानेन श्रुतिबाधायोगाच्च । किंच सर्वमानोपजीव्यप्रत्यक्षविरोधेप्यागमस्यैव प्राबल्यं विदुरुत्सर्गः तथा च
तत्पादोपजीविनो परकत्वोनुमानस्य का कथा । तथा च स्मृतिः प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतमि
ति । तथा च न विषयविचारयोरसिद्धिरिति सिद्धं । नन्वनन्ततार्किकोक्ष्मावितर्कुतर्कनिराकरणेन मंदानवगाह्य
माध्या श्रुतितात्पर्यवर्णनेन च प्रकरणानां सफलत्वं अस्य तु प्रकरणांतरैस्तुल्यार्थत्वात् रविषयादिमत्वेऽपि वि
र्थशास्त्रेतिहासपुराणसाहित्यप्रकरणकाव्यनाटकाख्यायिकादिषु वर्तमानदुरवगाह्यलौकिकन्याय
निचयार्थविषयापुष्टात् नेन सर्वोपकारित्वाद् इत्यारभ्यत्वं । पाल्मविषयाद्योयद्यपि प्रकरणानां शा
स्त्रीयाएव । तथापि प्रकरणत्वादेवार्थांतरविषयादयः संत्येव । तत्र शास्त्रं जिज्ञासुरेवांत्राधिकारी । स

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गुणनिर्गुणस्वविषयभेदं विहाय निर्गुणमात्रमिह विषयः । शास्त्रैकदेशत्वं च द्रष्टिस्वं तेन संगृहीतः । तन्मात्रावधारणम
लै॰ तं॰ ति गूढार्थात्मतात्पर्यार्थज्ञानेन च तार्किकोक्तविततयात्वेन तात्पर्यपरिपन्थिकुतर्कनिराकरणं चावान्तरप्रयोजनं तेषां येषां सं
३ गृहीतं । संबन्धविषययोरुक्तप्रयोजनस्य च प्रपञ्चेन । अथ अस्याध्यायस्य व्याख्यानमारभ्यते । तत्रादावस्याध्यायपञ्चके प्रथमे त्वं
पदार्थशोधनं । ततो द्वितीये उत्तमं कंपनन्यायेन तत्पदार्थशोधनं तृतीये वाक्यार्थनिरूपणं भविष्यति । स्थूलानि चेदनन्तानि
शाखालोकनन्यायाभ्यामुक्तार्थं दर्शयितुं हि क्रमतां तत्र सन्निरासार्थं बीजरस्यं प्रवृत्तिः । प्रथमाति सूक्ष्मार्थज्ञापनाय क्रमेण
तत्समीपसमीपतरसमीपतमार्थस्तत्त्वोपपत्तौ तन्मात्र अरुन्धतीन्यायो वक्तव्य इति । यथा ध्रुवमरुन्धतीं च दर्शयतीति
शिष्यविलक्षणतयोत्तरदर्शनेनातेति लक्षणायास्तत्वोऽदितिर्दर्शयितुमशक्यं तथा न वक्तुं इति तेन वदति । तत आरुन्धतीस्तत्स
मीपस्थास्तारकाः ततः सप्तर्षिसंज्ञकाः समीपतराः ततः समीपतमवशिष्ठनक्षत्रं तेनोक्त्वा तामेव तत्तया बोधयंति । तथा गृह
दीनात्मानं निर्वपस्यमानाः साक्षात्तदूर्ध्वं नष्टे नष्टोऽहमिति । सोऽशं तोदेर्पते । तास्मार्मन्ततीति श्रुतिः । आत्मा वै जायते पुत्र इति
नाथस्तु न स्मोत्स्मत्वेन वदति । ततो स्थ्यधीः पृथात्मत्वेनापर्थवस्यविति स वा एष पुरुषोऽन्नरसमय इति देहमात्मानं वदति । ८
ततोऽदेहमेवात्मानं न जानीयादिति तात्पर्यवती श्रुतिस्तेह प्राणाः प्रजापतिं समेत्य भूयाः स्यादिना श्रोत्रादीनां चेतनत्वं ।
स्थ्ययंतीत्तद्विनाभूतमात्रत्वमस्थापयति । तथैव पुनरन्योऽन्तर आत्मा प्राणमय इति प्राणोऽत्मत्वं भूते इंद्रियात्मत्वनिरासः रा॰मः
कृत इति चेत्सुषुप्तिदिति तात्मानं दानावस्थोत्मत्वएकाभावे देहस्थितिः स्मरतापत्तिः न वक्तव्येति नाशोवशिष्ठ ३
स्पष्टं स्पानात्वौपिकस्याविततो नौचोपवासी छतं कृदहेसए जायंवटेस्विवदति साम्यात्मनि ता । न दिस्थ्यतेपा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विवदन्त्याद्येभ्यश्च तत्कार्यनिर्वाहो धीनितान्तं · उत्तरहृदयस्य पूर्वस्या । डिल्लतया पूर्वेणानुभूतस्योत्तरेणास्मरणापत्तेः नान्यदृष्टं
स्मरत्यन्य इति न्यायात् · एकस्य कस्यचिदात्मत्वं तु विनिगमनाविरहेणाशक्यं वक्तुं नेषां प्रत्येकं भोक्तृत्वे त्वात्मत्वं चर्चध्रु
नामैकमत्यासंभवेनाविरुद्धदिक्क्रियापादवृत्तिकार्याभ्युपगमन्यायेन देहोमथनप्रसंगः नववरगोष्ठिन्यायेनैकमत्यं क
दाचिन्नत्वेत्वेविसदानंदसंभवात् · एकस्य माधान्योपगमेन्यतमस्यैवात्मत्वं युक्तं योनिभस्वभावस्य देहभेदव्याप्तत्वा
न देहेषु त्वानिभत्वन्यायस्थाप्यप्रवृत्तेः तस्माद्युक्त्या श्रुत्या तेषामात्मत्वधीनिरासाय प्राणस्यान्यत्वोक्तिः प्राणोपि तन्निरासा
प्रायोन्तरात्मा मनोमय इति च इति एवमन्योन्तरात्मा विज्ञानमयो न्योन्तर आत्मानन्दमय इत्याद्यविवेकध्वंसनतः पुत्राद्यानन्दम
यान्तानामनात्मत्वं दर्शयन्ती श्रुतिर्निर्विशेषमात्मतत्त्वमेवात्मत्वेन दर्शयति · तथाहि कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षु
राव ८ रमृत [illegible] मिच्छन् दीर्घमचक्षुरश्रोत्रं अप्राणो ह्यमनाः शुभ्रः अनंतरमात्मा विश्वरूपो ह्यकर्ता न चास्ति वेत्ता मम चित्सदाहं वि
ज्ञातोहं सदाशिवः एष त आत्मा सर्वान्तर इत्याद्याः श्रुतयो नादिमदनुवर्तमानचार्वाकादिभ्रमनिरासपूर्वकं तन्न्यायेन मुक्ता
द्वैतनन्त्वेन मुमुक्षुधीनिवेशाय पूर्वोक्तश्रुत्याभासान्नादितस्य पुत्राद्यात्मत्वस्य बाधपूर्वकमात्मतत्त्वं प्रतिपादयन्ति · किं च पुत्रा
त्मत्वश्रुतेर्गौणत्वं स्पष्टमेव भेदप्रसिद्धेः तेह प्राणा इत्यादिश्रुतौ प्राणादिशब्दास्तत्तद्देवतापरा इति स्पष्टमाकरस्थोपं अन्नमया
द्यानन्दमयान्तश्रुतेर्मुञ्जादिषीकोद्धरणन्यायेन सर्वान्तरश्रुत्येषु पुरुषशब्दार्थस्वरूपावधिभूतात्मतत्त्वप्रतिपत्त्युपायार्थत्वे
नोपन्यस्तत्वान्नतयोः स्वार्थपरत्वं प्रत्यगात्मत्वादिश्रुतीनां तु पक्रमादिलिंगैः स्वार्थपरत्वात्स्वार्थस्य प्रयोजनत्वात् पुत्राद्यानन्दम
यान्तमगदनात्मा इत्यवधार्यते · आत्मा हेनारबैर्त्तव्य भास्वः पदार्थत्वादिस्याद्यनुमानं तत्त्वमस्यादेवतादितादिस्यादिश्रुतिवा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धितं ज्ञाने नैकांतिकत्व· ज्ञानमपि वेद्यं चेत्स्ववेद्यत्वे आत्माश्रयः परवेद्यत्वेनवस्था· अस्तु को दोषो मूलक्षयाभावात्· न यदेवं नश्यायत्ते
सौ·सं· न देशाभ्यासंपद्यते· एवं महदेयम्बलीनि सर्वेषांग्रलि ज्ञानवान्स्यावेनाप्रामाणिकत्वप्रसक्तानवस्थाभ्रांतोधकूपदनत्वं स्यात्तत्र नष्ठ
४ कूर्थं न मूलक्षयप्रसक्तौ नगदाधाररूपदोषइत्यलं· तस्माद्देहादीनरस्तत्साक्षी वेदात्मैः प्रत्यक्तस्माद्येन वोधव्यत्ते इति सिद्धं· पंचकोशाव
नरणात्मा प्रस्तु श्रुतिमात्रसिद्धत्वान्नलौकिकः· एतत्तुल्यविषयप्रयोजनसम्बन्धः तथाहि· येष्टरलदेहादयः शुस्तान्नमयादिकाडे
कशात्तेकोशवत्कूमेराज्ञानंदावरकत्वया कोशाहेतुत्वात्कोशाइत्युच्यंते· तत्रपंचीकृतभूतोत्पन्नः स्थूलदेहोन्नमयकोशः· पंची
कृतगोत्पविंत्यशाक्तिरीराणेकेकंभूतंद्विधाविधायतेषुदचभागान्प्रत्येकंचतुर्धाविधायतेषांस्वस्वद्वितीयभागान्यस्थूलभागे
षुयोजयति· एवं च तेप्रत्येकं पंचपंचात्मकाभवंतीति· तेषुद्वितीयदादिव्यवहारक्रमःअस्मान्न्यायेनत्वाकाशाधिक्यात् नतुष्णुएतो
कंतारतम्यदशांशोभूतंपंचकमित्यार्थीकेचलंप्रलीतिहृक्षादेश्यप्रोमादिदशांशालाम्बंवापादेरितिगम्यते· तथाचाका
श्रांशव्याप्तिवायाद्वादिसर्वांशापेक्षयाव्याधिक्यात्सर्वगतव्यवहारएवस्यादिति· इष्यते न्यूनाधिकभावोहिश्रुत्यांप्रवेष्ठ
नभूतभूतेष्वेवनांतर्गतेष्वनुपपन्नभानात्· यथाहुः प्रत्यांडवरणेषु यत्न्यूनाधिकविचारणेति· तानिचापंचीकृतान्येवेति
यानिचाते प्रथितं· यथा चत्वोंशाधिक्यात्तत्सद्ववहारयोग्यानिस्थूलत्वेवमेलितानि· मतु कृविस्तमेवि भज्येतिपाठः
तत्रसमभिनिलतानायातं· यदापमंततदंशाधिक्यात्तत्व्यवहारयोग्यंयथास्यात्तथेतिसमर्थनीयं· एवंहिव्योम्निश राम:
ब्दोभिव्यज्यतेवायोस्पर्शोपि एवमग्रेपिबोध्यं· नचसर्वत्रसर्वकृतोनाभिव्यज्यंते इति वाच्यं अकल्पपंचीकरणस्यसाम्यात्· ४
तस्यआविर्भावमात्रगुणोपिव्यंजकत्वांशीकारात्· नचैवंसर्वत्रैकैकगुणाभिव्यक्तिरेवस्यात्तकार्यकारणगुणानुवृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निलीकारेणाकाशादिषु क्रमेणैकद्वित्रिचतुःपंचगुणानां प्रागपि सत्त्वात् त्रिवृत्करणश्रुतेः पंचीकरणोपलक्षणत्वान्न तस्याप्रा
माणिकत्वं तेभ्यश्च स्थूलदेहादयो जायंते· नेच नहि त्रिपुत्रो द्विपुत्र इति कथ्यत इति न्यायेन पांचभौतिकाद्यंतेष्व चतुरंशभाग
स्य भूतस्य प्राधान्यविवक्षायां देवदत्तपुत्रन्यायेन भौमादिव्यवहारस्यासंभवति अवकाशादिरूपकार्योपलंभाच्च कार्येण
कारणलंघनस्य यद् इति न्यायेनैक देहे कारणत्रयां च भूतसत्तावधार्या· स चैकानेकज्ञानगोचरत्वात् वनवत् समष्टिर्वृक्षवद्व्य
ष्टिश्च भवति· यथा व्यक्तिषु जातिवत्सर्वव्यष्टिषु अनुस्यूतसमजातीयं समष्टिः अनेकं शरीरं व्यष्टिः एतदुपहितं चैतन्यं विश्वन
५ गमिमानित्वाद्विविधं जन्मानलाद्वैश्वानर इति विराडिति चोच्यते· एतदुपहितं विश्वशरीरप्रविष्टत्वाद्विश्वः तथा
हि मीवर्स्य स्वयमुपाधयः सुषुप्तौ बुद्ध्यादिसंस्कारोपरंजितमज्ञानमात्रमुपाधिः स्वप्ने लिंगशरीरं तज्जाग्रत्तोपरंजितमह
मं इति प्रतीतेः जागरे तु मयपरशरीरं यंत्रं स्थूलशरीरं चीनोहं जिन्ध्विनोमज्ञोहमित्यनुभवात् एतत्देवान्तविकारत्वा
दन्नमय इत्युच्यते नन्च सर्वान्तरविशेषः पंचीकृताया भुव एवान्नाकारेण परिणतत्वात्तद्धेतीरेव तदस्तु किंतेनेति न्या
येन पांचभौतिकत्वानपायात् तमःप्रधानाज्ञानोपहितचैतन्यात् व्योमादयो जायंते ते सुखदुःखाकारणगुणप्रक्रमन्यायेन
सत्त्वादयो जायंते· तत्र तत्तरङ्गोद्देश्यो मिलितेभ्यः प्राणो जायते स चैकोपि स्थानभेदात् प्राणापानादिसंज्ञां लभते न नु
व्योमवद्देहे इति लाभमात्रेण वस्थितो वा स्य वायुरेवास्तु पंजरचालनन्यायेन वागादीनां सामान्यवृत्तिरूपा क्रियावा
स्तु किंविशेषकल्पनागौरवेण· धर्मिकल्पनातो धर्मकल्पनावरीयसी लिन्यायादिति चेन्न· एतस्मान्जायते प्राण इ
ति श्रुतेर्वायोरिन्द्रियाणां च प्राणात् पृथग्निर्देशात् तथा च न्यायः नवायुक्रिये पृथगुपदेशादिति व्यासोप्यसूत्रयत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

णयागादीनि जायन्ते तत्सहितैः प्राणैः प्राणमयकोशो भवति तत्सात्त्विकांशेभ्यो मिलितेभ्योऽन्तःकरणं जायते तच्च मनोबुद्ध्यात्मकं द्विवृ-
लौ.सं. ५ त्तिभेदाद्विविधं एतस्मात्पञ्चतन्मात्रः क्रमेण श्रोत्रादीनि जायन्ते तैः सहितेन मनोबुद्धी मनोमयविज्ञानमयकोशावुच्येते एतत्कोश-
त्रयं मिलितं सत्सप्तदशावयवं सूक्ष्मशरीरमिति लिङ्गमिति चोच्यते अत्रापि समष्टित्वव्यष्टित्वव्यवहारः पूर्ववन्मतभेदेन
ज्ञेयः तत्र समष्ट्युपहितं चैतन्यं हिरण्यगर्भ इत्युच्यते व्यष्ट्युपहितं तु तैजस इति अनिर्वचनीयं ज्ञानबाध्यं भावरूपं त्रिगु-
णात्मकमज्ञानं तदेव जीवेशाद्याभासेन करोति मायाविद्यापक्षद्वयमेव भवति विभुतो मायाविशदेनोच्यते तत्र शु-
द्धसत्त्वप्रधानं तन्मायेत्युच्यते मलिनसत्त्वप्रधानं त्वविद्येति सा च प्रियमोदादिसहितानन्दप्रचुरत्वादानन्दमयो बन्धहे-
तुत्वात्कोशः सूक्ष्मस्थूलदेहकारणत्वात्कारणशरीरमिति चोच्यते तदुपहितचित्प्राज्ञ इत्युच्यते मायोपहिता त्वीश्वर इति
एतयोरैक्यमग्रे वक्ष्यामः कोशानामनात्मत्वं तु पूर्वा एव युक्तयोऽनुसन्धेयाः संघातानामनात्मत्वमपीन्द्रियसंघातानात्मत्ववाक्ये
यमिति दिक् इति स्थूलादिशरीरत्रयनिरूपणम् ।१। अथादित आरभ्यैतावद्ग्रन्थसंदर्भं ग्रन्थकारा ग्रन्थान्तरेष्विव ये न्यायाः पठितास्ति पाठक्र-
मेणैव लिख्यन्ते संगतिस्तु प्रत्येकमेव यथाभिमुखपादप्रसारणन्यायेनापि देशसंगतिः प्रासंगिके प्रविषयस्याप्यसंग-
तिर्भविता सत्यापत्ये धर्माग्रं वदिष्यामः एवमग्रेऽपि बोध्यं यथार्थादर्शनतच्चोदनार्थ इति न्या ।०। शब्दस्वामिवचनमिदं
अस्ययः श्रुतार्थनां नरी प्रकृतया लभ्यते न स येषाम् अर्थ इत्यर्थः लोकाधारणाय न तु शब्दार्थ इति पठ्यते ।१। अनन्तलाभः रा.म:
शब्दार्थ इत्यवधेयः ।२। अक्षरशः शब्द इति बोध्यः परस्तात्सर्वविधयोग्यः स्वार्थः अवष्टम्भ्यतां ।३। कण्ठचामीकरन्या० ५
यथा कण्ठगतं हेम भ्रमवशान्नान्विष्य दशावस्थितं तदेवोपदेशात्प्राप्तं भवति सुपर्वसेन तथा प्रकृतेऽपीत्यर्थः ।४।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अङ्के चिरं निम्या० अङ्के गृह्णन् कोपोऽप्यस्तु म-यत् मन्नमेऽस्मिन्ननम्या० यथा नद्या [illegible] नारायणनाभिस्तः कदाचिन्मन्निर्मिदं [illegible] दुःखं
नितत्थे स्यर्थः ।६। पदातन्नपनितः सोऽयदालंबलमलभमानो न्याय्यकुलशिखि दुर्या काशादीनां लंबनेतदा दुर्या काशावलंबनम्या
थः अनेन हि दण्डसुग्रहिप्रसिरत्वासु निर्देशाप्रकृतौ यथलंबमानो लमने नकुर्यात् का [illegible] लंबनम्यायेनेतिनिरस्यते ।७। यथा
पंकलिप्तातुंबिका नदी समुद्रादौ मज्जंती पंकक्षयेऽवकाशे आगत्यानिष्ठतितथा जीवो देहक्षये लोकाकाशगत्वा तिष्ठति
अयमेव तस्य मोक्ष इति दिगंबराः इति जलतुंबिकान्यायः ।८। तदेकदेशिन स्तुपंजरमुक्तपक्षिन्यायेन लदोर्द्धगमनमेव त
स्य मोक्षं मन्यंते ।९। विक्षेपवद्बुलंधीथनमेव पुरुषार्थं मन्यमाना वालेश्वपुष्पदहस्ती पाद स्वलं इन्तत्व वानि कल्प दूषणो
ज्ञवनेनेति न्यायेन ते हाविरस्यन्ते ।१०। जीवः स्वविद्यादिभिर्देहांतरं नियाधेव पूर्वं स्यजतीति विरक्षायां त्तृणजलौ
कान्यायः लाविहित्वणोत्तरमाश्रित्येव पूर्वं त्यजति ।११। एकसंबंधिदर्शनमपरसंबंधिस्मारकमिति न्यायेन मनसो
न्ज्जनन्यायादनंतरं न्यायाः स्मत्वोदाहृताः हस्तिपकदर्शनस्य हस्तिस्मारकत्वं वत्नघादिज्ञानस्य तत्संबंधि कुशादि
स्मारकत्वं इतरस्याग्रह्येपि पंजरमुक्तेस्येव तथेवोदाहरणं विना घस्यन्याभेपलंगस्योदाहृतिः ।१२। स्थूणानिखनन
न्या० स्थूणां यथा सदृढत्वं संचाल्य निखननेक्रियमाणे दृढाभवति तथोत्तर ग्रंथेन प्राग्युक्तवादितार्थ दार्ढ्यं भावितेस्यर्थः ।१३।
सिंहावलोकनन्या० सिंहो यथाकं चिन्मृगं हत्वाऽग्रेगछन्नपादिवेस्या तमवि हन्यामितिधियापश्चाल्पश्यति तदिति व
हष्टिपथमागतं तथा बुद्धिपथमागतं त्वपक्षपाराविपरपरिकल्पित युक्त्याभासांतरं निराकायाघुत्तरग्रंथ
प्रवृत्तिरित्यर्थः ।१४। पारिवदन्या० यथा पारिषदनामेकास्मिन्नंतेप्यवशिष्टे तत्काव्यंनिर्वाहत्तथेस्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लौ·सं· ६

१५ नामदधतीति १६ वृन्दारकाः कृष्टेतिच स्पष्टौ १७ वृन्दारकपुरुषायोप्येतादृशाः १८ वरोहिन्या० गोछिरन्थोऽयवाग्रीवृर
जाभायगोछिर्वरगोछिन्नयावयाथवरथवर्थं धूनामेकमत्येनेति द्वियाकृत्यमेकं कार्यमिष्याघतेतथेत्यर्थः १९ त्यामिस्ङत्य
न्या· २० कुंभादिभिन्या० कुंभाद्युत्पत्तौ लोदोविकार्यमगर्भस्य मदुन्तोपथायदिशाय रक्ततयाच्यितानां कुंभावेतत्वानो वि
भजनेनमलुप्तिद्वयतेतथेत्यर्थः २१ गडुलिकाप्रवाहन्यायः गडुलिकानामवीनांगणो दैकाचेत्कूपेपतिता तदाधर्मा णा
अपि सर्वास्तत्र पतंतीति प्रसिद्धं २२ एतादृशा एवांधपरंपरान्या· सोप्यूर्द्ध्वपुत्यन्तवत्पन्यान्यल एवोदाहृयते २३ वदेय
क्षन्याये यदि वनपरंपरोपदेशान्मूलभूतोनुभवो नास्ति तदा सोप्येतादृशः सत्वेतु विलक्षण इतिबोध्यं २४ मद्दन्याम
न्या· यथा म्लेच्छस्यपि मद्दिणानो वृत्त्यान्मद्दन्ग्याम इत्युच्यतेतथेत्यर्थः २५ एतेनग्रामलणग्यामान्नवनादयोपिन्याया
विवृताः २६ २७ नहिनिंदुपुत्रइतिस्पष्टार्थः २८ देवदत्तापुत्रन्या· नहि देवदत्ताया एव पुत्रो भवति किंतु देवदत्तस्यापितत
थापि मातुः प्राधान्यविवक्षायां देवदत्तापुत्र इत्युच्यते २९ पितुः प्राधान्यविवक्षायां तु देवदत्तपुत्रन्यायेनैवदाह्रियते·
३० अत्रैव प्रासादवासिन्यायोप्यवतरति एकएव देवदत्तः कालभेदेन प्रासादोपर्यधश्च वसन्नपि प्रासादवासप्राधा
न्येन प्रासादवासीत्युच्यते ३१ कार्येण कारणोलंकारन्याय इति न्या० ३२ मद्यो गौरेवतंतदतुलिंकेतेनेतिन्या० तस्य कपाला दे
तोर्मृदादेरेव तत्र घटादिकारणत्वमस्तु किं तेनांतर्गडुनाकपालादिकल्पकार्येणेत्यर्थः ३३ कारणगुणप्रक्रमन्या० कारण राम
गुणाः कार्यगुणानारभन्ते यथा तंतुरूपादयः पटरूपादी[illegible]न्यायार्थः ३४ पंजरचालनन्या० यथा
स्वयत्नैर्दशभिः पक्षिभिरेकक्रियोत्पादनेन पंजरचालनं क्रियते [illegible] शाला [illegible]

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देहचालनं क्रियतामित्यर्थः तथा युक्तिपादे इत्यधिकरणपूर्वपक्षसमाधेयं २५ धर्मिकल्पनात इति स्पष्टः धर्मकल्पनायाः श्रेष्ठ्यं
लाघवप्रयुक्तं २६ सम्भवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यत इति न्यायोपि तथा बोध्यं २७ प्रकृतमनुसरामः एतेन भिक्षुपाद
प्रसारणन्यायोपि व्याख्यातप्रायः विषयोदाहरणसामान्यार्थसंगतौ तु यथा कश्चिद्द्विजः धर्मपथे दानवासगृहादिलाभाय १३
धनाढ्यगृहे प्रविष्टो युगपत्तद्धामं दुर्लभं मन्वानः पूर्वमिहैव दम्पसारस्तु मे भवतु पश्चात्स्वयं लप्स्ये क्रमेण सर्वं सं
ग्रहीष्यामीति धिया तां भिक्षां स्वीकरोति तथा मातेवातिहितैषिणी श्रुतिरद्वैततत्त्वं मुमुक्षुमतिप्रवेशासिद्धतीक्ष्णतमशक्यं
मन्यमानां पूर्वोक्तक्रमेण लक्षणामुख्येन बोधयतीति बोध्यं २।२८। सोपानारोहणन्यायोपीह बोध्यः यथा प्रासादमारुरु
क्षुर्युगपदारोढुमशक्नुवन् सर्वपूर्वकक्षां परित्यज्य अनुक्रमेण तत्तदारुहन् क्रमेण प्रासादमारोहति तथा त्वात्मप्रत
मदिब्रह्म ज्ञानाद्यवहितं तत्सिद्धवस्तुमात्मत्वेन ज्ञातुकामः सहसा ज्ञानमशक्नुवन् उत्तरोत्तरलक्ष्यापूर्वपूर्वात्मत्व
मवधीयाधेन क्रमेण प्रपञ्चोपशमं शिवमद्वैतं चतुर्थमात्मत्वेन जानातीति ३।२९। तस्माद्वा एतस्मादात्मन आकाशः सम्भूत
इत्यादौ तस्मिंस्तत्सकलं योध्यायते तत्र सोपानावरोहणन्
वध्यातोपेयस्तेषां पूर्वपूर्वस्मादुत्तरोत्तरस्योत्पत्तिः क्रमेणावरोहति तथा पूर्वोक्तपंचकोशावतरणन्यायेन तत्त्वबुद्धि
न्यायप्रवृत्तिः यथा येन क्रमेण लोकानां मात्रा हतिं तद्विपरीतक्रमेणावरोहति तथा पूर्वोक्तपंचकोशावतरणं इति लाभा
मारोह यदि नु सप्तस्कन्धो भोग्यभोगायतनं तत्त्वत्रयं चतुर्दशभुवनं तदाधारं ब्रह्माण्डानि पंचीकृतपंचभूतेभ्यो जातानि इत्येवं इति लाभा
माणेह यदि नु सप्तकोभोग्यभोगायतनं तत्र चतुर्दशभुवनं तदाधारब्रह्माण्डानि पंचीकृतपंचमहाभूतेभ्यो जातानि पृथ्वीरसतेजोवाय्वात्मकाकाशात्मकं तया भावयेत् तं
हयेत् तानि च सदसत्सूक्ष्मशरीरं अपञ्चीकृतभूतेभ्यः एवं गन्धतन्मात्रात्मकां पृथ्वीं रसतन्मात्रात्मकं वायुमात्रत्वेन तच्छब्दतन्मात्रात्मकाकाशमा
अपञ्चीकृतपञ्चात्मकं तेजोमात्मत्वेन तद्रसस्पर्शात्मकं वायुमात्रत्वेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नत्वेनतं चमदेश्वरमात्रतयाभावयेदिति एवं यथा पूर्वोक्तक्रमेणावरोहणात् सुखेन ब्रह्मभिमेतितथानेनक्रमेणाभ्यर्थना सु
औ॰सं॰ खेन ब्रह्मानमधिनी यदि वमेति प्रलयो प्यनेनैव क्रमेण बोध्यः। साक्षात्प्रकृतौ विकारलय इति न्यायात्। जगत्प्रतिष्ठा देव
७ र्षेः पृथिव्यप्सु प्रलीयते। आपो ज्योतिषि प्रलीयन्ते ज्योतिर्वायौ प्रलीयते वायुश्च लीयते व्योम्नि तत्वाव्यक्ते प्रलीयते। अव्यक्तं
पुरुषे ब्रह्मन्निष्कले संप्रलीयत इति स्मृतेश्च यातिकं कारे विश्वादीनामपि विलापनक्रममुक्तः। अकारं पुरुषं विश्वमु
कारे प्रविलापयेत्। उकारं तैजसं सूक्ष्मं मकारे प्रविलापयेत्। मकारं कारणं प्राज्ञं चिदात्मनि विलापयेदिति। अमापित द
तिरेकेण तद्भावभावनैव विलापनं एवमनेनैव क्रमेण प्रलयेऽप्युपाधिलयप्रयुक्तो लयो विबोध्यः। चिदात्मनो विकुत्र
विविलापनं लयश्च स्यादिति संकोचारयति श्रुतिः पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति ॥७।४०॥ साक्षात्प्रकृ
तावितिन्यायोऽत्र प्रासंगिकः घटदेवलयो हि कपालादावेव भवति न तु परमाणुषु तथैवानुभवादिति तदर्थः ॥१४१॥
एतेनाधारेपावदादाम्यं निश्चप्रपंचप्रपंच्यत इति न्यायो विख्यातो न। आद्यन्यायग्रहणेन्माधारेपस्य च तृतीयेनापवा
दस्य च प्रतिपादनात् ॥१।४२॥ रोगाश्वयन्यायो व्याख्यातः दृशः कीदृशो गवय इति ग्रामीणेन पृष्टो वन्यो लिखित्वा दर्शया
मास। स च नई बुद्धित्वात्रोगवय एव गवयं मेने। पश्चाद्वने गवयं दृष्ट्वा रोगायां तद्बुद्धिं तत्याजेति लौकिकी गाथा। त
थैव गुरुपदिष्टादिग्रुसेः पूर्वोक्तान्स्वयं तन्मनिति तोऽनात्मानमेवात्मतया जानीते गुरुः शास्त्रोपदेशेनात्मनिसानेन तां
बुद्धिमपवदतीति ॥१।४३॥ शाखाचंद्रन्यायो व्याख्यातः। यथा चंद्रं दिदृक्षोः शिशुः प्रागवस्थाकोदितरगतन्नक्षमादिश्यो दृष्टिं
धारयित्वा शाखाग्रं चंद्र इत्यधिकरणत्वेनासंबंधविशेषेण ताद्वेशाखामुपलक्षणतामुपादानेनतन्मदिशं दृश्या

तत्तद्घटपटादिसमीपवर्त्तितारकादिषु चंद्रभ्रमो माभूदिति तत्स्वरूपप्रकाशकत्वात्कं बोधयति· एवं हि को
ष्यधीसुखेन चंद्रे वतारितो भवति तथा पंचकोशावतरणवाक्यस्यापि बोधः· एवं ब्रह्मणि शाखाग्रमतिपरमित्युप
श्रुतस्य ब्रह्मशब्दस्यानेकत्र प्रयोगदर्शनान्मुमुक्षुभिर्जैयो ब्रह्मशब्दार्थः क इति जिज्ञासोर्जगत्कारणत्वोपला
क्षेन पंचसु जीवादिषु जगत्कारणत्वं न संभवति तेषां कार्योपाधितयोपाधिद्वारासंस्यकोटौ निविष्टत्वेन स्वघटत्वा
संभवात् तेभ्यो व्यावृत्तबुद्धेरपि संभवं ज्ञगत्कारणभावे प्रधानादिषु प्रसक्तस्य भ्रमस्यापनेतुं स्वरूपलक्षणमु
पन्यस्यते· नहि जडानां तेषां ज्ञानादिरूपतोपपद्यते ततश्चाद्यं लक्षणं केभ्यश्चिद्व्यावृत्तिनिश्चयपूर्वकबुद्धि
स्थिरीकरणार्थं द्वितीयं तु सर्वभ्रमनिवृत्तिपूर्वकवस्तुस्वरूपसत्तानिश्चयार्थं त्वंपदार्थतत्स्यत्वस्य लक्षण
योरपीदमेव प्रयोजनं बोध्यं ।।८४।। यत्रैकस्यैव वस्तुनो मतभेदेन बहूनि रूपाणि तत्र ज्ञात्वा तेषु प्रतिपाद्यमानान्यु
पलभ्य क्रियायां विकल्प्यते न वस्त्विति न्यायाद्वस्तुनि विकल्पासंभवं च मतवादिस्पृहानां समुच्चयस्याप्यसंभवेन ते
